# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

# VEDA MANTRA

Collection of Mantras
as taught by

## Shri M K Sivan

[Disciple of Guruji Shri S S Iyer, Arunalaya, Dombivli (East)]

At

Lakshmi Sabha Gruha
GMES High School Stilt
Vile Parle (East)

***********

*Compiled By Shri N K Venkitaraman.*

***********

[ For a free copy of printable PDF file write to nkv.nvr@gmail.com]

(All texts have been carefully proof-read. Every effort has been made to ensure that no errors exist in these texts. If you find an error, please report it so that it can be corrected.)

BOOK –2

MAHANYASAM & UPANISHAD

| SR NO | DETAILS | PAGE |
| --- | --- | --- |
| 1 | NAVAGRUHA STOTRAM | 5 |
| 2 | AADITYA HRIDAYAM | 7 |
| 3 | MAHANYAASAM | 12 |
| 4 | Kalasha Pratishtapana Mantra | 13 |
| 5 | Prathamonyasa | 15 |
| 6 | Dashanganyasa | 19 |
| 7 | Panchaganyasa | 19 |
| 8 | Hansa gayatri Strotram | 20 |
| 9 | Dikhsamputanyasa | 21 |
| 10 | Shodashanga Roudrikaranam | 24 |
| 11 | Aatma Raksha | 25 |
| 12 | Shivasankalpam | 27 |
| 13 | Purusha Sooktam | 31 |
| 14 | Aprathiratam | 32 |
| 15 | Pratipoorusham | 34 |
| 16 | Twamagne Rudro(a)nuvakam | 36 |
| 17 | Panchanga Japam | 37 |
| 18 | Saashtanga Namaskaram | 38 |
| 19 | Laghunyasa | 39 |
| 20 | Shodashopachara Pooja | 42 |
| 21 | Shree Rudra Naama Trishadi | 49 |
| 22 | Pradakshinam | 54 |
| 23 | Namaskaram | 55 |
| 24 | Praarthana | 57 |
| 25 | SHREE RUDRA PRASHNA | 58 |
| 26 | Nyaasa | 59 |
| 27 | Namakam | 62 |
| 28 | Chamakam | 72 |
| 29 | SHIVA(A)SHTOTRASHADA NAAMAVALI | 76 |
| 30 | Rudra Deeparadhana Mantra - 1 | 78 |
| 31 | Rudra Deeparadhana Mantra – 2 | 79 |
| 32 | Rudra Deeparadhana Mantra - 3 | 81 |
| 33 | SHIVA DHOOPADYUPACARA MANTRAM | 82 |
| 34 | SHREE SHIVA POOJA VIDHI | 86 |
| 35 | SHEEKSHA VAAALI (UPANISHAD) | 123 |
| 36 | ANANDA VAAALI (UPANISHAD) | 129 |
| 37 | BRUGU VAAALI (UPANISHAD) | 135 |
| | | |

| SR NO | DETAILS | PAGE |
|---|---|---|
| 38 | MAHA NARAYANA (UPANISHAD) | 140 |
| 39 | Ambasya pare | 140 |
| 40 | Gayatri Mantra | 142 |
| 41 | Doorva Sooktam | 143 |
| 42 | Mritika Sooktam | 144 |
| 43 | Shatrunjaya Mantra | 144 |
| 44 | Aghamarshana Sooktam | 146 |
| 45 | Durga Sooktam | 147 |
| 46 | Vyahruti Homa Mantram | 148 |
| 47 | Gyanaprapyartha Homa Mantram | 149 |
| 48 | Vedavismaranaya Homa Mantram | 149 |
| 49 | Tapa Prashansa | 149 |
| 50 | Vihitacharana Prashansa | 149 |
| 51 | Dhahara Vidya | 150 |
| 52 | Narayana Sooktam | 151 |
| 53 | Adityamandale Parabrimopasanam | 153 |
| 54 | Adityapurushasya pradarshanam | 153 |
| 55 | Shivopasana Mantra | 153 |
| 56 | Pratipadaka Mantra | 154 |
| 57 | Namaskarartha Mantra | 155 |
| 58 | Bhudevataka Mantra | 155 |
| 59 | Sandhyavandana Mantra | 156 |
| 60 | Trasuparna Mantra | 158 |
| 61 | Medha Sooktam | 159 |
| 62 | Mrityunivarana Mantra | 160 |
| 63 | Prarthana Mantra | 161 |
| 64 | Mrityunjaya Mantra | 161 |
| 65 | Papanivaraka Mantra | 162 |
| 66 | Kamokarsheeth Mantra | 162 |
| 67 | Viraja Homa Mantra | 163 |
| 68 | Vaishva Deva Mantra | 164 |
| 69 | Praanahuti Mantra | 165 |
| 70 | Bhuktanabhimantrana | 166 |
| 71 | Indrasaptharishi Samvada Mantra | 166 |
| 72 | Prarthana Mantras | 166 |
| 73 | Paratatva Nirupanam | 167 |
| 74 | Gyanasadhana Nirupanam | 168 |
| 75 | Gyana Yagna | 170 |
| | | |

## ॥ नवग्रह स्तोत्रम् ॥

जपा कुसुम संकाशं काश्यपेयं महद्युतिम् ।

तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥

दधि शङ्ख तुषाराभं क्षीरो दार्णव संभवम् ।

नमामि शशिनं सोमं शम्भो र्मुकुट भूषणम् ॥ २ ॥

धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम् ।

कुमारं शक्ति हस्तं तं मङ्गलं प्रणमाम्यहम् ॥ ३ ॥

प्रियङ्गु कलिका श्यामं रूपेणा प्रतिमं बुधम् ।

सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥

देवानां च ऋषीणां च गुरुं काञ्चन संनिभम् ।

बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥

हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम् ।

सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥

नीलांजन समाभासं रविपुत्रं यमा ग्रजम् ।

छाया मार्तण्ड संभूतं तं नमामि शनैश्चरम् ॥ ७ ॥

अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनम् ।

सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥

पलाश पुष्प संकाशं तारकाग्रह मस्तकम् ।

रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥

॥ फलश्रुतिः ॥

इति व्यास मुखोद्गीतं यः पठे त्सुसमाहितः ।

दिवा वा यदि वा रात्रौ विघ्नशान्ति र्भविष्यति ॥ १० ॥

नर नारी नृपाणां च भवे द्दुःस्वप्न नाशनम् ।

ऐश्वर्य मतुलं तेषा मारोग्यं पुष्टि वर्धनम् ॥

गृहनक्षत्रजाः पीडा स्तस्कराग्नि समुद्भवाः ।

ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥

॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥

# ॥ आदित्यहृदयम् ॥

असय श्री आदित्यहृदय स्तोत्र महामन्त्रस्य ,

अगस्त्यो भगवान् ऋषिः , अनुष्ठुप् छंदः ,

आदित्यात्मिक श्रीमन् सूर्यनारायणो देवता ।

॥ ध्यानम् ॥

जयतु जयतु सूर्यं सप्त लोकैक दीपम् किरण शमित पापं क्लेश दुखःस्य नाशम् ।

अरुण निगम गम्यम् चारुमादित्य मूर्तिं सकल भुवन वंद्यं भास्करम् तं नमामि ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।

रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।

उपागम्याब्रवीद् राममगस्त्यो भगवान् ऋषिः ॥ २ ॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।

येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३ ॥

आदित्यहृदयं पुण्यं सर्व शत्रु विनाशनम् ।

जयावहं जपेन्नित्यमक्षय्यं परमं शुभम् ॥ ४ ॥

सर्व मङ्गळ माङ्गल्यं सर्व पाप प्रणाशनम् ।

चिन्ता शोक प्रशमन मायु वर्धन मुत्तमम् ॥ ५ ॥

रश्मि मन्तं समुद्यन्तं देवा सुर नमस्कृतम् ।

पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।

येष देवा सुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥

येष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।

महेन्द्रो धनदः कालो यमः सोमोह्यापांपतिः ॥ ८ ॥

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।

वायुर्वह्निः प्रजा प्राण ऋतु कर्ता प्रभाकरः ॥ ९ ॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।

सुवर्ण सदृशो भानुः स्वर्ण रेता दिवाकरः ॥ १० ॥

हरिदश्वः सहस्रार्चिः सप्त सप्ति मरीचिमान् ।

तिमिरोन्मथनः शम्भु स्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।

अग्नि गर्भोऽदितेः पुत्रः शङ्खः शिशिर नाशनः ॥ १२ ॥

व्योमनाथ स्तमोभेदी ऋग्यजु स्साम पारगः ।

घन वृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः ॥ १३ ॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।

कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥

नक्षत्र ग्रह ताराणा मधिपो विश्व भावनः ।

तेजसा मपि तेजस्वी द्वादशात्म न्नमोऽस्तुते ॥ १५ ॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।

ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥

जयाय जयभद्राय हर्यश्वाय नमो नमः ।

नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥

नम उग्राय वीराय सारङ्गाय नमो नमः ।

नमः पद्म प्रबोधाय मार्ताण्डाय नमो नमः ॥ १८ ॥

ब्रह्मेशानाच्युतेशाय सूर्या यादित्य वर्चसे ।

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नाया मितात्मने ।

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥

तप्तचामीकराभाय वह्नये विश्वकर्मणे ।

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥

नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।

एष एवाग्नि होत्रञ्च फल ञ्चैवाग्नि होत्रिणाम् ॥ २३ ॥

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।

यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

॥ फलश्रुतिः ॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषुच ।

कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥

पूजयस्वै नमेकाग्रो देवदेवं जगत्पतिम् ।

एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।

एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम्॥ २७ ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।

धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥ २८ ॥

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान्।

त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥ २९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्।

सर्वयत्नेन महता वधे तस्य धृतोऽभवत्॥ ३० ॥

अथ रविरवदन्निरीक्ष्य रामं

मुदितमनाः परमं प्रहृष्यमाणः ।

निशिचरपतिसंक्षयं विदित्वा

सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

सूर्यं सुन्दर लोकनादऽमृतं वेदान्त सारं शिवं

ज्ञानं ब्रह्ममयम् सुरेशममलम् लोकैक चित्तस्वयम्।

इन्द्रादित्य नरादिवं सुरगुरुं त्रैलोक चूडामणिम्

ब्रह्माविष्णुशिव स्वरूप हृदयम् वन्दे सदा भास्करम्॥

भानोभास्कर मार्ताण्डा श्चण्ड रश्मि दिवाकरा

आयुरारोग्यमैश्वर्यं विध्यान्देहि नमोस्तुते ॥

# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

## ॥ ओं नमो भगवते रुद्राय ॥

## ॥ हरिः ओम् ॥ ओं अधातः पंचांग रुद्राणाम् ॥

ओंकार मंत्र संयुक्तं नित्यं ध्यायन्ति योगिनः । कामदं मोक्षदं तस्मै ओंकाराय नमोनमः ॥

नमस्ते देवदेवेश नमस्ते परमेश्वर । नमस्ते वृषभारूढ नकाराय नमोनमः ॥

महादेवं महात्मानं महा पातक नाशनम् । महा पाप हरं वंदे मकाराय नमोनमः ॥

शिवं शान्तं जगन्नाधं लोकानुग्रह कारणम् । शिवमेकं परं वंदे शिकाराय नमोनमः ॥

वाहनं वृषभो यस्य वासुकिः कंठ भूषणम् । वामे शक्तिधरं वंदे वकाराय नमोनमः ॥

यत्र कुत्र स्थितं देवं सर्व व्यापिनमीश्वरम् । यल्लिंगं पूजयेन्नित्यं यकाराय नमोनमः ॥

## ॥ शिवोपासन मंत्राः ॥

निधनपतये नमः । निधनपतान्तिकाय नमः ।

ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः ।

हिरण्याय नमः । हिरण्यलिङ्गाय नमः ।

सुवर्णाय नमः । सुवर्णलिङ्गाय नमः ।

दिव्याय नमः । दिव्यलिङ्गाय नमः ।

भवाय नमः । भवलिङ्गाय नमः ।

शर्वाय नमः । शर्वलिङ्गाय नमः ।

शिवाय नमः । शिवलिङ्गाय नमः ।

ज्वलाय नमः । ज्वललिङ्गाय नमः ।

आत्माय नमः । आत्मलिङ्गाय नमः ।

परमाय नमः । परमलिङ्गाय नमः ।

एतत्सोमस्य सूर्यस्य सर्वलिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम् ॥

# ॥ महन्यासम् ॥

## हरिः ओम् ॥ ओं अधातः पंचांग रुद्राणाम् ॥

॥ ओं नमो भगवते रुद्राय ॥

### ॥ कलशप्रतिष्टापन मंत्रा ॥

**कलशादि पूजां कृत्वा । कुम्भ स्थापनं कुर्यात् । तत मंत्रा ॥**

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठाः स्सतश्च योनिमसतश्च विवः ॥
नाके सुपर्णमुप यत्पतन्तः हृदा वेनन्तो अभ्यचक्ष तत्वा ।
हिरण्यपक्षं व्रुणस्य दूतम् यमस्य योनौ शकुनं भुरण्युम् ॥
ओं आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य संगथे ॥
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा
भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाः सुरे ॥
इन्द्रं विश्वा अवीवृधन् त्समुद्र व्यच संगिरः ।
रथीतमः रथीनाम् वाजानाः सत्पतिं पतिम् ॥
आपो वा इदः सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽ न्नमापो
ऽमृतमाप स्संम्राडापो विराडाप स्स्वराडाप श्छन्दाः स्यापो ज्योतीः ष्यापो
यजूः ष्याप स्सत्यमाप स्सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥
अपः प्रणयति । श्रद्धा वा आपः । श्रद्धा मेवारभ्य प्रणीय प्रचरति ।
अपः प्रणयति । यज्ञो वा आपः । यज्ञ मेवारभ्य प्रणीय प्रचरति ।

अपः प्रणयति । वज्रो वा आपः । वज्र मेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति ।

अपः प्रणयति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै ।

अपः प्रणयति । आपो वै देवानां प्रियं धाम । देवानामेव प्रियं धाम प्रणीय प्रचरति ।

अपः प्रणयति । आपो वै सर्वा देवताः । देवता एवारभ्य प्रणीय प्रचरति ।

अपः प्रणयति । आपो वै शान्ताः । शान्ता भिरेवास्य शुचꣳ शमयति ।

देवो वः सवितो त्पुना त्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ॥

कूर्चाग्रैः राक्षसान् घोरान् छिन्धि कर्म विघातिनः ।

त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि ।

वृक्षराज समुद्भूताः शाखायाः पल्लवत्वचः ।

युष्मान् कुम्भे ष्वर्पयामि सर्व पापा पनुत्तये ।

नालिकेरसमुद्भूत त्रिनेत्र हर सम्मित ।

शिखया दुरितं सर्वं पापं पीडां च मे नुद ।

स हि रत्नानि दाशुषे सुवाति सविता भगः ।

तं भागं चित्रमीमहे ॥

इमं मे वरुण श्रुधी हव मध्याच मृडय त्वामव स्युराचके

तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥

ओं भूर्भुवस्सुवरोम् । अस्मिन् कुम्भे वरुणमावाहयामि ।

वरुणस्य इदमासनम् । वरुणाय नमः । सकलाराधनैः स्वर्चितम् ।

# महन्यासम्

॥ ओं अधातः पंचांग रुद्राणाम् न्यास पूर्वकं
जप होमार्चनाऽभिषेक विधिं व्याख्यास्यामः ॥

॥अथ प्रथमो न्यासः ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
हꣳ स श्शुचिष द्वसु रन्तरिक्ष सद्धोता वेदिष दतिथि र्दुरोणसत् ।
नृषद्वर सदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्यो र्मुक्षीय माऽमृतात् ॥
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च ॥
मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी र्हविष्मन्तो नमसा विधेम ते ॥
अवतत्य धनुस्तवꣳ सहस्राक्ष शतेषुधे ॥
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।

नीलग्रीवाः शितिकण्ठाः शर्वा अधः , क्षमाचराः ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥
परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥
वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथाय नमः
सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां

ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

नमो वः किरिकेभ्यो देवाना॒ँ हृदयेभ्यः ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः ॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवा॒ँ उत ।

अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषा॒ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषा॒ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥

स शिरा जातवेदाः अक्षरं परमं पदं ।

वेदाना॒ँ शिरसि माता आयुष्मन्तं करोतु माम् ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

एष ते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो

मूजवतोऽती ह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः ॥

सꣳ सृष्ट जित् सोमपा बाहु शर्ध्यू ध्र्वधन्वा प्रतिहिता भिरस्ता ।
बृहस्पते परि दीया रथेन रक्षोहाऽमित्राꣳ अपबाधमानः ॥
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥
ये पथां पथिरक्षय ऐलबृदा यव्युधः ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वांश्च यातुधान्यः ॥
नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ॥
प्रमुञ्च धन्वनस्त्वभमुभयोरार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्रभयोजनेऽवधन्वानि तन्मसि ॥

## ॥ दशांगन्यासः ॥

॥ अथ द्वितीयो न्यासः ॥

॥ ओं नमो भगवते रुद्रयेति नमस्कारं न्यसेत् ॥

ओं नमः ॥  नं नमः ॥  मों नमः ॥

भं नमः ॥  गं नमः ॥  वं नमः ॥  तें नमः ॥

रुं नमः ॥  द्रां नमः ॥  यं नमः ॥

## ॥ पंचागन्यास ॥

॥ अथ तृतीयो न्यासः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथाय नमः
सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

## ॥ हंस गायत्री स्तोत्रम् ॥

अस्य श्री हंस गायत्री महामंत्रसय। अव्यक्त पर ब्रह्म ऋषिः।

अनुप्टुष् छन्दः। परम हंसो देवता।

हंसां बीजम् । हंसीं शक्तिः। हंसूं कीलकम्।

परम हंस प्रसाद सिद्ध्यर्थे जपे विनियोगः॥

हंसां अंगुष्ठाभ्यां नमः॥ हंसीं तर्जनीभ्यां नमः॥ हंसूं मध्यमाभ्यां नमः॥

हंसैं अनामिकाभ्यां नमः॥ हंसौं कनिष्ठिकाभ्यां नमः॥

हंसः करतमकरपृष्ठाभ्यां नमः॥

हंसां हृदयाय नमः॥ हंसीं शिरसे स्वाहा॥ हंसूं शिखायै वषट्॥

हंसैं कवचाय हुम्॥ हंसौं नेत्रत्रयाय वौषट्॥ हंसः अस्त्राय फट्ः॥

भूर्भुवस्सुवरोमिति दिग्भन्धः॥

### ॥ ध्यानम् ॥

गमागमस्थं गमनादि शून्यं चिद्रूप दीपं तिमिरा पहारम्।

पश्यामि ते सर्व जनान्तरस्थं नमामि हंसं परमात्म रूपम्॥

हंस हंसाय विद्महे परमहंसाय धीमहि।

तन्नो हंसः प्रचोदयात्॥ (Repeat 3 Times)

हंस हंसेति योब्रूया-द्धंसो नाम सदाशिवः।

एवं न्यास विधिं कृत्वा ततः संपुट-मारभेत्॥

॥ दिक्संपुटन्यासः ॥

ओं भूर्भुवस्सुवरों - लं

त्रातारमिन्द्र मवितार-मिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।

हुवेनुशक्रं पुरुहूत-मिद्रꣳ स्वस्तिनो मघवाऽधात्विन्द्रः ॥

लं - इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावत वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

लं - इन्द्राय नमः । पूर्व दिग्भागे इन्द्रः सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - रं

त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासि सीष्ठाः ।

यजिष्ठो वह्नि तम श्शोशुचानो विश्वा द्वेषाꣳ सि प्रमु मुग्ध्यस्मत् ॥

रं - अग्नये शक्ति हस्ताय तेजोऽधिपतये अज वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

रं - अग्नये नमः । आग्नेय दिग्भागे अग्निः सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - हं

सुगन्नः पन्था मभयं कृणोतु । यस्मिन् नक्षत्रे यम एति राजा ।

यस्मिन्नेन मभ्यषिञ्चन्त देवाः । तदस्य चित्रꣳ हविषा यजाम ॥

अप पाप्मानं भरणी भरन्तु ॥

हं - यमाय दन्ड हस्ताय धर्माधि पतये महिष वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

हं - यमाय नमः । दक्षिण दिग्भागे यमः सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - षं

असुन्वन्त मयजमान मिच्छ स्तेन स्येत्यां तस्कर स्यान्वेषि ।

अन्य मस्मदिच्छ सात इत्या नमो देवि निरृत्ते तुभ्यमस्तु ॥

षं - निर्ऋतये खड्ग हस्ताय रक्षोधि पतये नर वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

षं - निर्ऋतये नमः । नैर्ऋत दिग्भागे निर्ऋति सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - वं

तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥

वं - वरुणाय पाश हस्ताय जलाधि पतये मकर वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

वं - वरुणाय नमः । पश्चिम दिग्भागे वरुणः सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - यं

आनो नियुद्भिः शति नी भिरध्वरं । सहस्त्रिणी भि रुप याहि यज्ञम् ।

वायो अस्मिन् हविषि मादयस्व । यूयं पातः स्वस्तिभिः सदानः ॥

यं - वायवे साङ्कुश ध्वज हस्ताय प्राणाधि पतये मृग वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः ।

यं - वायवे नमः । वायव्य दिग्भागे वायुः सुप्रीतो वरदो भवतु ॥

ओं भूर्भुवस्सुवरों - सं

वयꣳ सोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

सं - सोमाय अमृत कलश हस्ताय नक्षत्राधि पतये अश्व वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः।

सं - सोमाय नमः। उत्तर दिग्भागे सोमः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों - शं

तमीशानं जगत स्त स्थुष स्पतिम्। धियं जिन्व मवसे हूमहे वयम्।

पूषानो यथा वेदसा मस-द्वृधे रक्षिता पायु रदब्धः स्वस्तये॥

शं - ईशानाय शूल हस्ताय विद्याधि पतये वृषभ वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः।

शं - ईशानाय नमः। ऐशान दिग्भागे ईशानः सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों - अं

अस्मे रुद्रा मेहना पर्वतासो वृत्र हत्ये भरहूतो सजोषाः।

य श्शंसते स्तुवते धायि पज्र इन्द्र ज्येष्ठा अस्मां अवन्तु देवाः॥

अं - ब्रह्मणे पद्म हस्ताय लोकाधि पतये हंस वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः।

अं - ब्रह्मणे नमः। ऊर्ध्व दिग्भागे ब्रह्मा सुप्रीतो वरदो भवतु॥

ओं भूर्भुवस्सुवरों - ह्रीं

स्योना पृथिवि भवाऽनृक्षरा निवेशनि। यच्छानश्शर्म सप्रथाः।

ह्रीं - विष्णवे चक्र हस्ताय नागाधि पतये गरुड वाहनाय

सांगाय सायुधाय सशक्ति परिवाराय उमामहेश्वर पार्षदाय नमः।

ह्रीं - विष्णवे नमः। अधो दिग्भागे विष्णुः सुप्रीतो वरदो भवतु॥

॥ अथ तृतीय न्यासे शोडशांग रौद्रीकरणम् ॥

विभूरसि प्रवाहणो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

श्वात्रो ऽसि प्रचेता रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

तुथो ऽसि विश्ववेदा रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

उशिगसि कवी रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

अङ्घारिरसि बम्भारी रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

सम्राडसि कृशानू रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

परिषद्यो ऽसि पवमानो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

प्रतक्वासि नभस्वान रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

असंमृष्टोऽसि हव्यसू दो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

ऋतधामाऽसि सुवर्ज्योती रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

ब्रह्मज्योति-रसि सुवर्धामा रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

अजो ऽस्येकपाद् रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

अहिरसि बुध्नियो रौद्रेणानीकेन पाहिमाग्ने पिपृहि मा मामा हिꣳ सीः ॥

त्वगस्थि-गतैः सर्वपापैः प्रमुच्यते। सर्व भूतेष्व पराजितो भवति। ततो भूत प्रेत पिशाच ब्रह्म राक्षस यक्ष यमदूत शाकिनी ढाकिनी सर्प श्वापद वृश्चिक तस्कर द्युपद्रवा द्युपघाताः। स्सर्वे ज्वलंतं पश्यन्तु। मां रक्षंतु। मां स कुटुंबं रक्षंतु।

[ यजमानं रक्षंतु / सर्वान् महा जनान् रक्षंतु ]

## ॥ अथ चतुर्थो न्यासः ॥

### ॥ आत्मरक्षा ॥

मनो ज्योति -र्जुषता माज्यं विच्छिन्नं यज्ञꣳ समिमं-दधातु ।
या इष्टा उषसो निम्रु-चश्च तास्स-न्दधामि हविषा घृतेन ॥

अबो-ध्यग्नि स्समिधा जनानां प्रति-धेनु मिवायती मुषासम् ।
यह्वा इव प्रवया मुज्जिहानाः प्रभा-नव स्सिस्त्रते नाकमच्छ ॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाꣳ रेताꣳसि जिन्वति ।

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर मृताय जात-मग्निम् ।
कविꣳ सम्राज मतिथिं जनाना मासन्ना पात्रं जनयन्त देवाः ॥

मर्माणि ते वर्म भिश्छादयामि सोमस्त्वा राजाऽमृते-नाभिऽवस्ताम् ।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वा मनु मदन्तु देवाः ॥

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोसि ।
शं प्रजाभ्यो यजमानाय लोकम् । ऊर्जं पुष्टिं दद -दभ्याव वृथ्स्व ॥

### ॥ आत्मरक्षा कर्तव्य ॥

ब्रह्मात्मन् वद सृजत । तद -कामयत । समात्मना पद्येयेति ।
आत्मन्नात्मन् नित्या-मन्त्रयत । तस्मै दशमꣳ हूतः प्रत्य शृणोत् ।
स दश हूतोऽभवत् । दश हूतो ह वै नामैषः । तं वा एतं दश हूतꣳ सन्तम् ।

दश होतेत्या चक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै सप्तमꣳ हूतः प्रत्य शृणोत्।
स सप्त हूतोऽभवत्। सप्त हूतो ह वै नामैषः। तं वा एतꣳ सप्त हूतꣳ सन्तम्।
सप्त होतेत्या चक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै षष्ठꣳ हूतः प्रत्य शृणोत्।
स षड्ढूतोऽभवत्। षड्ढूतो ह वै नामैषः। तं वा एतꣳ षड्ढूतꣳ सन्तम्।
षड्डोतेत्या चक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै पञ्चमꣳ हूतः प्रत्य शृणोत्।
स पञ्च हूतोऽभवत्। पञ्च हूतो ह वै नामैषः। तं वा एतं पञ्च हूतꣳ सन्तम्।
पञ्च होतेत्या चक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै चतुर्थꣳ हूतः प्रत्य शृणोत्।
स चतुर् हूतोऽभवत्। चतुर् हूतो ह वै नामैषः। तं वा एतं चतुर् हूतꣳ सन्तम्।
चतुर् होतेत्या चक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥

तमब्रवीत्। त्वं वै मे नेदिष्ठꣳ हूतः प्रत्य श्रौषीः।
त्वयै नाना ख्यातार इति। तस्मान्नु हैनाꣳ श्चतुर् होतार इत्या चक्षते।
तस्मा च्छुश्रूषुः पुत्रणाꣳ हृद्यतमः। नेदिष्ठो हृद्यतमः।
नेदिष्ठो ब्रह्मणो भवति। य एवं वेद॥

॥ आत्मने नमः॥

॥ अथ पंचमो न्यासः ॥

येनेदं भूतं भुवनं भविष्यत् परिगृहीत-ममृतेन सर्वम् ।
येन यज्ञ-स्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारु यन्ति ।
य-त्सम्मित मनु-संयन्ति प्राणिन तन्मे मनः शिवसंकल्पमस्तु ॥

येन कर्माण्य पसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्ष-मन्तं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

यत्प्रज्ञान-मुत चेतो धृतिश्च यज्ज्योति-रन्तर-मृतं प्रजासु ।
य-स्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

सुषारथिर-श्वानिव यन्मनुष्या न्नेनी-यते ऽभीशुभि र्वाजिन इव ।
हृ-त्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥

यस्मि-न्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता रथनाभा विबाराः ।
यस्मिꣳँ श्चितꣳ सर्व-मोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

यदत्र षष्ठं त्रिशतꣳ सुवीरं यज्ञस्य गुह्यं नव-नाव माय्यं ।
दश पञ्च त्रिꣳ शतं यत्परंच तन्मे मनः शिवसंकल्पमस्तु ॥

यज्जाग्रतो दूर-मुदैति दैवं तदु सुप्तस्य तथै-वैतिः ।
दूरं-गमं ज्योतिषां ज्योति-रेकं तन्मे मनः शिवसंकल्पमस्तु ॥

ये नेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः ।
त-देवाग्नि स्तमसो ज्योति रेकं तन्मे मनः शिवसंकल्पमस्तु ॥

येन द्यौः पृथिवी चां-तरिक्षं च ये पर्वताः प्रदिषो दिशश्च ।
ये नेदं जगद् व्याप्तं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्य रश्मिः ।
ते श्रोत्रे चक्षुषी संचरन्तं तन्मे मनः शिवसंकल्पमस्तु ॥

अचिन्तयं चाप्रमेयं च व्यक्ता-व्यक्त परं च यत् ।
सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसंकल्पमस्तु ॥

एका च दश शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च
समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः शिवसंकल्पमस्तु ॥

ये पंच पंच दश शतꣳ सहस्र मयुत न्न्यर्बुदं च ।
ते अग्नि चित्तेष्ट-कास्तꣳ शरीरं तन्मे मनः शिवसंकल्पमस्तु ॥

वेदाहमेतं पुरुषं महांत मादित्यवर्णं तमसः परस्तात् ।
यस्य योनिं परि पश्यन्ति धीरा स्तन्मे मनः शिवसंकल्पमस्तु ॥

यस्येदं धीराः पुनंति कवयो ब्रह्माण मेतं त्वा वृणत-मिन्दुम् ।
स्थावरं जंगमं द्यौ-राकाशं तन्मे मनः शिवसंकल्पमस्तु ॥

परात्पर-तरं चैव यत्परा-च्चैव यत्परम् ।
यत्परा-त्परतो ज्ञेयं तन्मे मनः शिवसंकल्पमस्तु ॥

परात्पर-तरो ब्रह्मा तत्परा-त्परतो हरिः ।
यत्परा -त्परतोऽधीश स्तन्मे मनः शिवसंकल्पमस्तु ॥

या वेदा-दिषु गायत्री सर्व-व्यापी महेश्वरी ।
ऋग्यजु स्सामा थ-र्वैश्च तन्मे मनः शिवसंकल्पमस्तु ॥

यो वै देवं महादेवं प्रणवं परमेश्वरम् ।
य स्सर्वे सर्व वेदैश्च तन्मे मनः शिवसंकल्पमस्तु ॥

प्रयतः प्रणवोंकारं प्रणवं पुरुषोत्तमम् ।
ओंकारं प्रणवात्मानं तन्मे मनः शिवसंकल्पमस्तु ॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसंकल्पमस्तु ॥

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसंकल्पमस्तु ॥

कैलास शिखरे रम्ये शंकरस्य शिवालये ।
देवता स्तत्र मोदन्ते तन्मे मनः शिवसंकल्पमस्तु ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मााामृतात्तन्मे मनः शिवसंकल्पमस्तु ॥

विश्वत श्चक्षु रुत विश्वतो मुखो विश्वतो हस्त उत विश्व-तस्पात् ।
सं बाहुभ्यां नमति सं पतत्रै र्द्यावापृथिवी जनयन्देव एकस्तन्मे मनः शिवसंकल्पमस्तु ॥

चतुरो वेदान धीयीत सर्व-शास्त्र मयं विदुः ।
इतिहास पुराणानां तन्मे मनः शिवसंकल्पमस्तु ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त मुत मा न उक्षितम् ।
मानोऽवधीः पितरं मोतमातरं प्रियामानस्तनुवो रुद्र रीरिषस्तन्मे मनः शिवसंकल्पमस्तु ॥

मानस्तोके तनये मा न आयुषि  मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मानो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेमते तन्मे मनः शिवसंकल्पमस्तु ॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मनः शिवसंकल्पमस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंत-मꣳ हृदे ।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्पमस्तु ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवस्तन्मे मनः शिवसंकल्पमस्तु ॥

यः प्राणतो निमिषतो महित्वैक  इद्राजा जगतो बभूव ।

य ईशे अस्य द्विपद-श्चतुष्पदः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसंकल्पमस्तु ॥

य आत्मदा बलदा यस्य विश्व उपा-सते प्र-शिषं यस्य देवाः ।

यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसंकल्पमस्तु ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना

विवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसंकल्पमस्तु ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियं तन्मे मनः शिवसंकल्पमस्तु ॥

य इदꣳ शिव संकल्पꣳ सदा ध्यायन्ति ब्राह्मणाः ।

ते परं मोक्षं गमिष्तान्ति तन्मे मनः शिवसंकल्पमस्तु ॥

॥ हृदयाय नमः ॥

## ॥पुरुष सूक्तम्॥

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदꣳ सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः। पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो विश्वङ्व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः। यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मः शरद्धविः। सप्तास्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूꣳस्ताꣳश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये। तस्माद्यात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत। तस्मादश्वा अजायन्त। ये के चो भयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः। पद्भ्याꣳ शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाꣳ अकल्पयन्। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य

धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः।

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेयऽनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमनो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेदसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मम् जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टम् मनिषाण। अमुं मनिषाण। सर्वम् मनिषाण।

## ॥ अप्रतिरथं ॥

आशुः शिशानो वृषभो न युध्मो घनाघनः , क्षोभण श्चर्षणीनाम्।
संक्रन्दनोऽनिमिष एक-वीरः शतᳪ सेना अजय थ्साक-मिन्द्रः॥
संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यव वनेन धृष्णुना।
तदिन्द्रेण जयत तथ्स हध्वं युधो नर इषु हस्तेन वृष्णा॥
स इषु हस्तैः स निषङ्गिभि र्वशी सᳪँ स्रष्टा स युध-इन्द्रो गणेन।
सᳪ सृष्ट जिथ्सोमपा बाहु शर्ध्यू र्ध्वधन्वा प्रतिहिता भिरस्ता॥

बृहस्पते परि दीया रथेन रक्षोहाऽमित्राꣳ अपबाधमानः ।
प्रभञ्जन्थ्सेनाः प्रमृणो युधा जय-न्नस्माक मेध्यविता रथानाम् ॥
गोत्रभिदं गोविदं वज्र-बाहुं जयन्त मज्म प्र-मृणन्त मोजसा ।
इमꣳ सजाता अनु वीर-यध्व मिन्द्रꣳ सखायोऽनु सꣳ रभध्वम् ॥
बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभि-सत्वा सहोजा जैत्र मिन्द्र रथमा तिष्ठ गोवित् ॥
अभिगोत्राणि सहसा गाहमानोऽदायो वीरः शतमन्यु-रिन्द्रः ।
दुश्चयवनः पृतनाषड युद्ध्योऽस्माकꣳ सेना अवतु प्र युथ्सु ॥
इन्द्र आसां नेता बृहस्पति दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेना नामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
महा-मनसां भुवनच्च्य वानां घोषो देवानां जयता मुदस्थात् ॥
अस्माक मिन्द्रः समृतेषु ध्वजे-ष्व स्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भव-न्त्वस्मानु देवा अवता हवेषु ॥
उ-द्धर्षय मघव न्नायुधा न्यु-थ्सत्वनां मामकानां महाꣳसि ।
उ-द्वृत्रहन् वाजिनां वाजिना न्यु-द्रथानां जयता मेतु घोषः ॥
उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः ।
इन्द्रो वः शर्म यच्छत्वना धृष्या यथाऽसथ ॥
अव-सृष्टा परा पत शरव्ये ब्रह्म-सꣳ शिता ।
गच्छा-मित्रान् प्रविश मैषां कं चनो च्छिषः ॥

मर्माणि ते वर्म भिश्छादयामि सोमस्त्वा राजाऽमृते नाभिऽवस्तां ।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वा मनु मदन्तु देवाः ॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
इन्द्रो न-स्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥

॥ कवचाय हुम् ॥

## ॥ प्रतिपूरुषम् ॥

प्रतिपूरुष-मेककपाला न्निर्व-पत्येक मतिरिक्तं यावन्तो गृह्याः स्म-स्तेभ्यः कमकरं
पशूनाᳪ शर्माऽसि शर्म यजमानस्य शर्म-मे यच्छैक एव रुद्रो-न द्वितीयाय तस्थ
आखुस्ते रुद्र पशुस्तं जुष-स्वैष-ते रुद्र भागः सह-स्वस्राऽम्बिकया तं जुषस्व
भेषजं गवेऽश्वाय पुरुषाय भेषज मथो अस्मभ्यं भेषजᳪ सुभेषजं यथाऽसति ॥
सुगं मेषाय मेष्या अवाम्ब रुद्र-मदि मह्यव देवं त्र्यम्बकम् ।
यथानः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात् ॥
त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
एष ते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो
मूजवतोऽती ह्यव-ततधन्वा पिनाकहस्तः कृत्तिवासाः ॥
प्रतिपूरुषमेककपाला न्निर्वपति । जाता एव प्रजा रुद्रा न्निरवदयते ।
एक मतिरिक्तम् । जनिष्यमाणा एव प्रजा रुद्रा न्निरवदयते ।
एककपाला भवन्ति । एक-धैव रुद्र न्निरवदयते । नाभि-घारयति ।
यदभि-घारयेत् । अन्तरव चारिणᳪ रुद्रं कुर्यात् । एको-ल्मुकेन यन्ति ।

तद्धि रुद्रस्त भाग-धेयम । इमां दिशं यन्ति । एषा वै रुद्रस्य दिक् ।
स्वाया-मेव दिशि रुद्रं न्निरवदयते । रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत ।
असौ ते पशुरिति निर्दि-शेद्यं द्विष्यात् । य-मेव द्वेष्टि ।
तमस्मै पशुं निर्दिशति । यदि न द्विष्यात् । आखुस्ते पशुरिति ब्रूयात् ।
न ग्राम्यान् पशून् हिनस्ति । नारण्यान् । चतुष्पथे जुहोति ।
एष वा अग्नीनां पड्बीशो नाम । अग्निवत्येव जुहोति ।
मध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु ।
अन्तमे नैव होतव्यम् । अन्तत एव रुद्र न्निरवदयते ।
एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह । शरद्वा अस्याम्बिका स्वसा ।
तया वा एष हिनस्ति । यꣳ हिनस्ति । तयै वैनꣳ सह शमयति ।
भेषजं गव इत्याह । यावन्त एव ग्राम्याः पशवः । तेभ्यो भेषजं करोति ।
अवाम्ब रुद्र मदि महीत्याह । आशिषमे वैता-माशास्ते ।
त्र्यंबकं यजामह इत्याह । मृत्योर्मुक्षीय माऽमृता दिति वा वै-तदाह ।
उत्किरन्ति । भगस्य लीप्सन्ते । मूते कृत्वाऽऽसजन्ति ।
यथा जनं यतेऽवसं करोति । तादृ-गेवा तत् ।
एष ते रुद्र भाग इत्याह निरवत्त्यै ।
अप्रती-क्षमायन्ति । अपः परिषिञ्चति ।
रुद्रस्या न्तर्हित्यै । प्र वा एतेऽस्मा ल्लोकाच्च्य-वन्ते ।
ये त्र्यम्बकै श्चरन्ति । आदित्यं चरुं पुनरेत्य निर्व-पति ।
इयं वा अदितिः । अस्या-मेव प्रति तिष्ठन्ति ॥
॥ नेत्रत्रयाय वौषट् ॥

## ॥ त्वमग्ने रुद्रोऽनुवाकः ॥

त्वमग्ने रुद्रो असुरो महो दिवः। त्वꣳ शर्धो मारुतं पृक्ष ईशिषे।

त्वं वातै रुणैर् यासि शङ्गयः। त्वं पूषा विधतः पासि नुत्मना ॥

देवा देवेषु श्रयध्वम्। प्रथमा द्वितीयेषु श्रयध्वम्। द्वितीया स्तृतीयेषु श्रयध्वम्।

तृतीया श्चतुर्थेषु श्रयध्वम्। चतुर्थाः पञ्चमेषु श्रयध्वम्। पञ्चमाः षष्ठेषु श्रयध्वम्।

षष्ठाः सप्तमेषु श्रयध्वम्। सप्तमा अष्टमेषु श्रयध्वम्। अष्टमा नवमेषु श्रयध्वम्।

नवमा दशमेषु श्रयध्वम्। दशमा एकादशेषु श्रयध्वम्। एकादशा द्वादशेषु श्रयध्वम्।

द्वादशा स्त्रयोदशेषु श्रयध्वम्। त्रयोदशा श्चतुर्दशेषु श्रयध्वम्।

चतुर्दशाः पञ्चदशेषु श्रयध्वम्। पञ्चदशाः षोडशेषु श्रयध्वम्।

षोडशाः सप्तदशेषु श्रयध्वम्। सप्तदशा अष्टादशेषु श्रयध्वम्।

अष्टादशा एकान्न विꣳशेषु श्रयध्वम्। एकान्न विꣳशा विꣳशेषु श्रयध्वम्।

विꣳशा एक विꣳशेषु श्रयध्वम्। एक विꣳशा द्वा विꣳशेषु श्रयध्वम्।

द्वा विꣳशा स्त्रयो विꣳशेषु श्रयध्वम्। त्रयो विꣳशा श्चतुर्विꣳशेषु श्रयध्वम्।

चतुर्विꣳशाः पञ्च विꣳशेषु श्रयध्वम्। पञ्चविꣳशाः षड्विꣳशेषु श्रयध्वम्।

षड्विꣳशाः सप्त विꣳशेषु श्रयध्वम्। सप्तविꣳशा अष्टा विꣳशेषु श्रयध्वम्।

अष्टाविꣳशा एकान्न त्रिꣳशेषु श्रयध्वम्। एकान्न त्रिꣳशा स्त्रिꣳशेषु श्रयध्वम्।

त्रिꣳशा एक त्रिꣳशेषु श्रयध्वम्। एक त्रिꣳशा द्वा त्रिꣳशेषु श्रयध्वम्।

द्वा त्रिꣳशा स्त्रय स्त्रिꣳशेषु श्रयध्वम्। देवा स्त्रिरेकादशा स्त्रिस्त्रय स्त्रिꣳशाः।

उत्तरे भवत। उत्तर वर्त्मान उत्तर सत्वानः। यत्काम इदं जुहोमि।

तन्मे समृद्ध्यताम्। वयꣳ स्याम पतयो रयीणाम्। भूर्भुवः स्वः स्वाहा ॥

॥ अस्त्रायफट् ॥

॥ इति पंचमो न्यासः ॥

॥ अथ पंचांग जपः ॥

हꣳ स श्शुचिष द्वसु रन्तरिक्ष सद्धोता वेदिष दतिथि दुरोणसत्।
नृषद्वर सदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

प्रतद्विष्णुस्स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा।

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।

तत्सवितु-र्वृणीमहे। वयं देवस्य भोजनम्।
श्रेष्ठꣳ सर्व धातमम्। तुरं भगस्य धीमहि॥

विष्णु-योनि कल्पयतु। त्वष्टा रूपाणि पिꣳशतु।
आसिं चतु प्रजापतिः। धाता गर्भं दधातु ते॥

**॥ अथ साष्टांग नमस्कारः ॥**

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्या-मुतेमां कस्मै देवाय हविषा विधेम ॥ उमामहेश्वराभ्यां नमः ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपद श्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ उमामहेश्वराभ्यां नमः ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठाः स्सतश्च योनिमसतश्च विवः ॥ उमामहेश्वराभ्यां नमः ॥

महि द्यौः पृथिवी च न इमं यज्ञ मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥ उमामहेश्वराभ्यां नमः ॥

उपश्वासय पृथिवी मुत-द्यां पुरुत्रा-ते मनुतां विष्टितं जगत् ।
स दुंदुभे सजू-रिंद्रेण देवे-दूरा द्वीयो अप सेध शत्रून् ॥ उमामहेश्वराभ्यां नमः ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयो ध्यस्म ज्जुहुराण मेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥ उमामहेश्वराभ्यां नमः ॥

या ते अग्ने रुद्रिया तनूस्तयानः पाहि तस्यास्ते स्वाहा ॥ उमामहेश्वराभ्यां नमः ॥

( या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठ गह्वरेष्ठोग्रं
वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा )

इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभि स्संविदानः ।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ उमामहेश्वराभ्यां नमः ॥

उरसा शिरसा दृष्ट्या मनसा वधसा तथा ।
पद्भ्यां कराभ्यां कर्णाभ्यां प्रणा मोष्टांग उच्यते ॥ उमामहेश्वराभ्यां नमः ॥

## ॥ लघुन्यासः ॥

**ओं नमो भगवते रुद्राय।**

**ओं अथात्मानं शिवात्मानं श्री रुद्र रूपं ध्यायेत्॥**

शुद्ध स्फटिक संकाशं त्रिनेत्रं पञ्च वक्त्रकम्।

गङ्गाधरं दशभुजं सर्वाभरण भूषितम्॥

नीलग्रीवं शशाङ्काङ्कं नाग यज्ञोपवीतिनम्।

व्याघ्र चर्मोत्तरीयं च वरेण्यमभय प्रदम्॥

कमण्डल्वक्ष सूत्रेच दधानं शूलपाणिनम्।

ज्वलन्तं पिङ्गल जटा शिखा मद्योत धारिणम्॥

वृषस्कन्ध समारूढं उमादेहार्ध धारिणम्।

अमृतेनाप्लुतं हृष्ठं दिव्यभोग समन्वितम्॥

दिग्देवता समायुक्तं सुरासुर नमस्कृतम्।

नित्यं च शाश्वतं शुद्धं ध्रुवमक्षर मव्ययम्॥

सर्व व्यापिन मीशनं रुद्रं वै विश्वरूपिणम् (द्विजस्सम्यक् ततो यजनमारभेत्) ॥

प्रजनने ब्रह्मा तिष्ठतु। पादयो र्विष्णु स्तिष्ठतु। हस्तयो र्हर स्तिष्ठतु।

बाह्वो रिंद्र स्तिष्ठतु। जठरे अग्नि स्तिष्ठतु। हृदये शिव स्तिष्ठतु।

कंठे वसव स्तिष्ठंतु। वक्त्रे सरस्वती तिष्ठतु। नासिकयो र्वायु स्तिष्ठतु।

नयनयो श्चंद्रादित्यौ तिष्ठेताम्। कर्णयो रश्विनौ तिष्ठेताम्।

ललाटे रुद्र स्तिष्ठंतु। मूर्ध्न्यादित्या स्तिष्ठंतु। शिरसि महादेव स्तिष्ठतु।

शिखायां वामदेव स्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु।

पार्श्वयोः शिवाशंकरौ तिष्ठेताम्। सर्वतो वायु स्तिष्ठतु।

ततो बहिः सर्वतोऽग्नि ज्वालामाला परिवृत स्तिष्ठतु।

सर्वे ष्वंगेषु सर्वा देवता यथा स्थानं तिष्ठंतु।

माम् रक्षंतु । सर्वान् महा जनान् रक्षंतु ।

अग्निर्मे वाचि श्रितः। वाग्घृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

वायुर्मे प्राणे श्रितः। प्राणो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

सूर्यो मे चक्षुषि श्रितः। चक्षुर् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

दिशो मे श्रोत्रे श्रिताः। श्रोत्रꣳ हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आपो मे रेतसि श्रिताः। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पृथिवी मे शरीरे श्रिता। शरीरꣳ हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ओषधि वनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये।

हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

इन्द्रो मे बले श्रितः। बलꣳ हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ईशानो मे मन्यौ श्रितः। मन्युर् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्।

वैश्वानरो रश्मिभिर्वा वृधानः। अन्तस्तिष्ठ त्वमृतस्य गोपाः॥

आराधितो मनुष्यैस्त्वं सिद्धै र्देवा सुरादिभिः।

आराधयामि भक्त्या त्वा ऽनुग्रहाण महेश्वर॥

# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

# ॥ साम्ब परमेश्वर षोडशोपचार पूजा ॥

**॥ कलशेषु ध्यानम् ॥**

ध्याये न्निरामयं वस्तु सर्ग स्थिति लयादिकम् ।
निर्गुणं निष्कलं नित्यं मनो वाचाम गोचरम् ॥
गंगाधरं शशिधरं जटा मकुट शोभितम् ।
श्वेत भूति त्रिपुण्ड्रेण विराजित ललाटकम् ॥
लोचनत्रय संपन्नं स्वर्ण कुण्डल शोभितम् ।
स्मेराननं चतुर्बाहुं मुक्ता हारोप शोभितम् ॥
अक्षमालां सुधा कुंभं चिन्मयीं मुद्रिकामपि ।
पुस्तकं च भुजै र्दिव्यै र्दधानं पार्वती पतिम् ॥
श्वेताम्बरधरं श्वेतं रत्न सिंहासन स्थितम् ।
सर्वाभीष्ट प्रदातारं वटमूल निवासिनम् ॥
वामांगे संस्थितां गौरीं बालार्कायुत सन्निभाम् ।
जपा कुसुम साहस्र समान श्रिय मीश्वरीम् ।
सुवर्ण रत्न खचित मकुटेन विराजिताम् ॥
ललाट पट्ट संराजत् संलग्न तिलकांचिताम् ।
राजीवायत नेत्रान्तां नीलोत्पल दलेक्षणाम् ॥
सन्तप्त हेमरचित ताटंका भरणान्विताम् ।
ताम्बूल चर्वण रत रक्त जिह्वा विराजिताम् ॥
पताकाभरणो पेतां मुक्ता हारोप शोभिताम् ।

स्वर्ण कंकण संयुक्तै श्चतुर्भि र्बाहुभि र्युताम्॥
सुवर्ण रत्न खचित कांची दाम विराजिताम्।
कदली ललित स्तम्भ सन्नि भोरु युगान्विताम्॥
श्रिया विराजित पदां भक्तत्राण परायणाम्।
अन्योन्या श्लिष्ट हृद्बाहु गौरीशंकर संज्ञकम्॥
सनातनं परं ब्रह्म परमात्मान मव्ययम्।
मंगलाय तनं देवं युवान मति सुन्दरम्।
ध्यायेत् कल्पतरोर्मूले सुखासीनं सहोमया॥
आवाहयामि जगता मीश्वरं परमेश्वरम्॥

आ त्वा वहन्तु हरय स्सचेतसः, श्वेतै रश्वै स्सह केतु मद्भिः।
वाता जितै र्बल वद्भि र्मनोजवै रायाहि शीघ्रं मम हव्याय शर्वोम्॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥
गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥

॥ आवाहनम्॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥
ओं ह्रीं नमः शिवाय। सद्योजातं प्रपद्यामि। ओं भूर्भुवस्सुवरों अस्मिन् कुम्भे

( अस्यां प्रतिमायां )

महादेवं ध्यायामि आवाहयामि ॥

शिवं ध्यायामि आवाहयामि ॥

रुद्रं ध्यायामि आवाहयामि ॥

शंकरं ध्यायामि आवाहयामि ॥

नीललोहितं ध्यायामि आवाहयामि ॥

ईशानं ध्यायामि आवाहयामि ॥

विजयं ध्यायामि आवाहयामि ॥

भीमं ध्यायामि आवाहयामि ॥

देवदेवं ध्यायामि आवाहयामि ॥

भवोद्भवं ध्यायामि आवाहयामि ॥

( मध्ये ) आदित्यात्मक रुद्रं ध्यायामि आवाहयामि ॥

( इति तत्त् कलशेषु आवाह्य )

॥ प्राणप्रतिष्ठा ॥

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां प्राणप्रतिष्ठा महामन्त्रस्य ।

ब्रह्मा विष्णु महेश्वरा ऋषयः । ऋ ग्यजु स्सामा थर्वाणि छन्दांसि ।

सकल जगत्सृष्टि स्थिति संहार कारिणी प्राणशक्तिः परादेवता ।

आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां प्राणप्रतिष्ठार्थे जपे विनियोगः ॥

आं अंगुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । क्रों मध्यमाभ्यां नमः ।

आं अनामिकाभ्यां नमः। ह्रीं कनिष्ठिकाभ्यां नमः। क्रों करतमकरपृष्ठाभ्यां नमः।

आं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्रों शिखायै वषट्।

आं कवचाय हुं। ह्रीं नेत्रत्रयाय वषट्। क्रों अस्त्राय फट्ः।

भूर्भुवस्सुवरोमिति दिग्बन्धः॥

॥ ध्यानम्॥

रक्ताम्भोधिस्थ पोतोल्ल सदरुण सरोजाधि रूढा कराब्जैः

पाशं कोदण्ड मिक्षूद् भव मळिगुण मप्यंकुशं चापबाणाम्।

बिभ्राणा सृक्कपालं त्रिणयन लसिता पीन वक्षो रुहाढ्या

देवी बालार्क वर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

आं - ह्रीं - क्रों , क्रों - ह्रीं - ओं , यरलवशषसहों ।

क्षं हंसः - सोहं , सोहं - हंसः।

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां प्राणा इह प्राणाः।

आं - ह्रीं - क्रों , क्रों - ह्रीं - ओं , यरलवशषसहों ।

क्षं हंसः - सोहं , सोहं - हंसः।

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां जीव इह स्थितः।

आं - ह्रीं - क्रों , क्रों - ह्रीं - ओं , यरलवशषसहों ।

क्षं हंसः - सोहं , सोहं - हंसः।

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां सर्वेन्द्रियाणि

वाङ् मन श्चक्षु श्रोत्र जिह्वा घ्राण प्राणापान व्यानोदान समानाः, इहैवागत्य

इहैवास्मिन् एषु कुंभेषु ( अस्याम् प्रतिमायां / अस्मिन् लिंगे / अस्मिन् चित्र पटे / अस्मिन् सालग्राम शिलाचके ) सुखं चिरं तिष्ठन्तु स्वाहा॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नौ धेहि भोगम् ।
ज्योक् पश्येम सूर्य मुच्चरन्त मनुमते मृडया न स्स्वस्ति ॥

आवाहितो भव । स्थापितो भव । सन्निहितो भव । सन्निरुद्दो भव ।

अवकुण्ठितो भव । सुप्रीतो भव । सुप्रसन्नो भव । वरदो भव ।

स्वामिन् प्रसीद प्रसीद । स्वामिन् सर्व जगन्नाथ यावत्पूजा वसानकम् ।

तावत्त्वं प्रीति भावेन कुम्भेऽस्मिन् सन्निधिं कुरु ॥

आदित्यात्मक रुद्रस्य आवाहितानां सर्वानां देवतानां प्राणान् प्रतिष्ठापयामि ।

( पंचोपचार पूजा ॥ यत्किंचिन्निवेदनम् ॥ )

या त इषुः शिवतमा शिवम् बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
ओं ह्रीं नमः शिवाय । सद्योजाताय वै नमो नमः । रत्न सिंहासनं समर्पयामि ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥
ओं ह्रीं नमः शिवाय । भवे भवे नातिभवे भवस्य माम् । पादयोः पाद्यं समर्पयामि ॥

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥
ओं ह्रीं नमः शिवाय । भवोद्भवाय नमः । अर्घ्यं समर्पयामि ॥

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥
ओं ह्रीं नमः शिवाय । वामदेवाय नमः । आचमनियं समर्पयामि ॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥
ओं ह्रीं नमः शिवाय । ज्येष्ठाय नमः । मधु पर्कं समर्पयामि ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाँ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाँ हेड ईमहे ॥
ओं ह्रीं नमः शिवाय । श्रेष्ठाय नमः । स्नानं समर्पयामि । स्नानानन्तरं
आचमनियं समर्पयामि ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥
ओं ह्रीं नमः शिवाय । रुद्राय नमः । वस्तोतरियं समर्पयामि ॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ॥
ओं ह्रीं नमः शिवाय । कालाय नमः । यज्ञोपवीताभरणानि समर्पयामि ॥

प्रमुञ्च धन्वनस्त्वभमुभयोरार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥
ओं ह्रीं नमः शिवाय । कल विकरणाय नमः । गन्धान् धारयामि । गन्धस्योऽपरि
अक्षतान् समर्पयामि ॥

अवतत्य धनुस्तवँ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥
ओं ह्रीं नमः शिवाय । बल विकरणाय नमः । पुष्पैः पूजयामि ॥

ओं भवाय देवाय नमः । ओं शर्वाय देवाय नमः । ओं ईशानाय देवाय नमः ।

ओं पशुपतये देवाय नमः । ओं रुद्राय देवाय नमः । ओं उग्राय देवाय नमः ।

ओं भीमाय देवाय नमः । ओं महते देवाय नमः ।

ओं भवस्य देवस्य पत्न्यै नमः । ओं शर्वस्य देवस्य पत्न्यै नमः ।

ओं ईशानस्य देवस्य पत्न्यै नमः । ओं पशुपतेः देवस्य पत्न्यै नमः ।

ओं रुद्रस्य देवस्य पत्न्यै नमः । ओं उग्रस्य देवस्य पत्न्यै नमः ।

ओं भीमस्य देवस्य पत्न्यै नमः । ओं महतो देवस्य पत्न्यै नमः ।

ॐ महादेवादिभ्यो रुद्रेभ्यो नमः । समस्तोपचारान् समर्पयामि ॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।

अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥

ओं ह्रीं नमः शिवाय । बलाय नमः । धूपमाघ्रापयामि ॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥

तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ।

ओं ह्रीं नमः शिवाय । बलप्रमथनाय नमः । दीपं दर्शयामि ।

दूप दीपा नंतरं आचमनीयं समर्पयामि ॥

ओं भूः भुवः स्सुवः । ओं तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

देव सवितः प्रसुव । सत्यं त्वर्तेन परिषिंचामि । अमृतोपस्तरणमसि । प्राणाय स्वाहा ।

अपानाय स्वाहा । व्यानाय स्वाहा । उदानाय स्वाहा । समानाय स्वाहा । ब्रह्मणे स्वाहा ।

नमस्ते अस्त्वायुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने ॥

ओं ह्रीं नमः शिवाय। सर्वभूत दमनाय नमः। महा नैवेद्यं निवेदयामि।

मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि। हस्त प्रक्षालनं समर्पयामि।

पाद प्रक्षालनं समर्पयामि। आचमनियं समर्पयामि॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।

अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥

ओं ह्रीं नमः शिवाय। मनोन्मनाय नमः। कर्पूर ताम्बूलं निवेदयामि।

समस्तोपचारान् समर्पयामि ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्रयम्बकाय त्रिपुरान्तकाय त्रिकाग्नि

कालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय

श्रीमन्महादेवाय नमः॥

ॐ महादेवादिभ्यो रुद्रेभ्यो नमः । सर्व उपचारार्थे कर्पूरनीराजनम् प्रदर्शयामि ।

बृहत्साम क्षत्रभृद् वृद्ध वृष्णियं। त्रिष्टुभौज श्शुभित मुग्र चीरम्।

इन्द्रस्तोमेन पंचदशेन मध्य मिदं वातेन सगरेण रक्ष॥

रक्षां धारयामि॥

## ॥ श्रिरुद्रनाम त्रिशति॥

नमो हिरण्यबाहवे नमः। सेनान्ये नमः। दिशां च पतये नमः। नमो वृक्षेभ्यो नमः।

हरिकेशेभ्यो नमः। पशूनां पतये नमः। नमः सस्पिञ्जराय नमः। त्विषीमते नमः।

पथीनां पतये नमः। नमो बभ्लुशाय नमः। विव्याधिने नमः। अन्नानां पतये नमः।

नमो हरिकेशय नमः। उपवीतिने नमः। पुष्टाणं पतये नमः। नमो भवस्य हेत्यै नमः।

जगतां पतये नमः। नमो रुद्राया नमः। आततविने नमः। क्षेत्राणां पतये

नमः। नमः सूताय नमः। अहन्त्याय नमः। वनानां पतये नमः। नमो रोहिताय नमः। स्थपतये नमः। वृक्षाणं पतये नमः। नमो मन्त्रिणे नमः। वाणिजाय नमः। कक्षाणं पतये नमः। नमो भुवंतये नमः। वारिवस्कृताय नमः। ओषधीनां पतये नमः। नम उच्चैर्घोषाय नमः। आक्रन्दयते नमः। पत्तीनाम् पतये नमः। नमः कृत्स्नवीताय नमः। धावते नमः। सत्वनां पतये नमः॥

नमः सहमानाय नमः। निव्यादिने नमः। आव्याधिनीनां पतये नमः। नमः ककुभाय नमः। निषङ्गिणे नमः। स्तेनानां पतये नमः। नमो निषङ्गिणे नमः। इषुधिमते नमः। तस्कराणां पतये नमः। नमो वञ्चते नमः। परिवञ्चते नमः। स्तायूनां पतये नमः। नमो निचेरवे नमः। परिचराय नमः। अरण्यानां पतये नमः। नमः सृकाविभ्यो नमः। जिघाꣳसद्भ्यो नमः। मुष्णतां पतये नमः। नमोऽसिमद्भ्यो नमः। नक्तंचरद्भ्यो नमः। प्रकृन्तानां पतये नमः। नम उष्णीषिने नमः। गिरिचराय नमः। कुलुञ्चानां पतये नमः। नम इषुमद्भ्यो नमः। धन्वाविभ्यश्च नमः। वो नमः। नम आतन्वानेभ्यो। प्रतिदधानेभ्यश्च नमः। वो नमः। नम आयच्छद्भ्यो नमः। विसृजद्भ्यश्च नमः। वो नमः। नमोऽस्यद्भ्यो नमः। विध्यद्भ्यश्च नमः। वो नमः। नम आसीनेभ्यो नमः। शयानेभ्यश्च नमः। वो नमः। नमः स्वपद्भ्यो नमः। जाग्रद्भ्यश्च नमः। वो नमः। नमस्तिष्ठद्भ्यो नमः। धावद्भ्यश्च नमः। वो नमः। नमस्सभाभ्यो नमः। सभापतिभ्यश्च नमः। वो नमः। नमो अश्वेभ्यो नमः। अश्वपतिभ्यश्च नमः। वो नमः।

नम आव्यधिनीभ्यो नमः। विविध्यन्तीभ्यश्च नमः। वो नमः। नम उगणाभ्यो नमः। तृꣳहतीभ्यश्च नमः। वो नमः। नमो गृत्सेभ्यो नमः। गृत्सपतिभ्यश्च नमः।

वो नमः। नमो व्रातेभ्यो नमः। व्रातपतिभ्यश्च नमः। वो नमः। नमो गणेभ्यो नमः। गणपतिभ्यश्च नमः। वो नमः। नमो विरूपेभ्यो नमः। विश्वरुपेभ्यश्च नमः। वो नमः। नमो महद्भ्यो नमः। क्षुल्लकेभ्यश्च नमः। वो नमः। नमो रथिभ्यो नमः। अरथेभ्यश्च नमः। वो नमः। नमो रथेभ्यो नमः। रथपतिभ्यश्च नमः। वो नमः। नमस्सेनाभ्यो नमः। सेननिभ्यश्च नमः। वो नमः। नमः , क्षत्तृभ्यो नमः। संग्रहीतृभ्यश्च नमः। वो नमः। नमस्तक्षभ्यो नमः। रथकारेभ्यश्च नमः। वो नमः। नमः कुलालेभ्यो नमः। कर्मारेभ्यश्च नमः। वो नमः। नमः पुंजिष्टेभ्यो नमः। निषादेभ्यश्च नमः। वो नमः। नम इषुकृद्भ्यो नमः। धन्वकृद्भ्यश्च नमः। वो नमः। नमो मृगयुभ्यो नमः। श्वनिभ्यश्च नमः। वो नमः। नमः श्वभ्यो नमः। श्वपतिभ्यश्च नमः। वो नमः।

नमो भवाय च नमः। रुद्राय च नमः। नमश्शर्वाय च नमः। पशुपतये च नमः। नमो नीलग्रीवाय च नमः। शितिकण्ठाय च नमः। नमः कपर्दिने च नमः। व्युप्तकेशाय च नमः। नमस्सहस्राक्षाय च नमः। शतधन्वने च नमः। नमो गिरिशाय च नमः। शिपिविष्टाय च नमः। नमो मीढुष्टमाय च नमः। इषुमते च नमः। नमो ह्रस्वाय च नमः। वामनाय च नमः। नमो बृहते च नमः। वर्षीयसे च नमः। नमो वृद्धाय च नमः। संवृध्वने च नमः। नमो अग्रियाय च नमः। प्रथमाय च नमः। नम आशवे च नमः। अजिराय च नमः। नमः शीघ्रियाय च नमः। शीभ्याय च नमः। नम ऊर्म्याय च नमः। अवस्वन्याय च नमः। नमः स्त्रोतस्याय च नमः। द्वीप्याय च नमः।

नमो ज्येष्ठाय च नमः। कनिष्ठाय च नमः। नमः पूर्वजाय च नमः।

अपरजाय च नमः। नमो मध्यमाय च नमः। अपगल्भाय च नमः।
नमो जघन्याय च नमः। बुध्नियाय च नमः। नमः सोभ्याय च नमः।
प्रतिसर्याय च नमः। नमो याम्याय च नमः। क्षेम्याय च नमः।
नम उर्वर्याय च नमः। खल्याय च नमः। नमः श्लोक्याय च नमः।
अवसान्याय च नमः। नमो वन्याय च नमः। कक्ष्याय च नमः।
नमः श्रवाय च नमः। प्रतिश्रवाय च नमः। नम आशुषेणाय च नमः।
आशुरथाय च नमः। नमः शूराय च नमः। अवभिन्दते च नमः।
नमो वर्मिणे च नमः। वरूथिने च नमः। नमो बिल्मिने च नमः। कवचिने च नमः।
नमश्श्रुताय च नमः। श्रुतसेनाय च नमः।

नमो दुन्दुभ्याय च नमः। आहनन्याय च नमः। नमो धृष्णवे च नमः।
प्रमृशाय च नमः। नमो दूताय च नमः। प्रहिताय च नमः। नमो निषङ्गिणे च नमः।
इषुधिमते च नमः। नमस्तीक्ष्णेषवे च नमः। आयुधिने च नमः।
नमः स्वायुधाय च नमः। सुधन्वने च नमः। नमः स्रुत्याय च नमः।
पथ्याय च नमः। नमः काट्याय च नमः। नीप्याय च नमः। नमस्सूद्याय च नमः।
सरस्याय च नमः। नमो नाद्याय च नमः। वैशन्ताय च नमः।
नमः कूप्याय च नमः। अवट्याय च नमः। नमो वर्ष्याय च नमः।
अवर्ष्याय च नमः। नमो मेघ्याय च नमः। विद्युत्याय च नमः।
नम ईध्रियाय च नमः। आतप्याय च नमः। नमो वात्याय च नमः।
रेष्मियाय च नमः। नमो वास्तव्याय च नमः। वास्तुपाय च नमः।

नमस्सोमाय च नमः। रुद्राय च नमः। नमस्ताम्राय च नमः। अरुणाय च नमः।

नमः शङ्गाय च नमः। पशुपतये च नमः। नम उग्राय च नमः।
भीमाय च नमः।नमो अग्रेवधाय च नमः। दूरेवधाय च नमः। नमो हन्त्रे च नमः।
हनीयसे च नमः। नमो वृक्षेभ्यो नमः। हरिकेशेभ्यो नमः। नमस्ताराय नमः।
नमश्शंभवे च नमः। मयोभवे च नमः। नमश्शंकराय च नमः। मयस्कराय च नमः।
नमः शिवाय च नमः। शिवतराय च नमः। नमस्तीर्थ्याय च नमः।
कूल्याय च नमः। नमः पार्याय च नमः। अवार्याय च नमः।
नमः प्रतरणाय च नमः। उत्तरणाय च नमः। नम आतार्याय च नमः।
आलाद्याय च नमः। नमः शष्प्याय च नमः। फेन्याय च नमः।
नमः सिकत्याय च नमः। प्रवाह्याय च नमः।

नम इरिण्याय च नमः। प्रपथ्याय च नमः। नमः किꣳशिलाय च नमः।
क्षयणाय च नमः। नमः कपर्दिने च नमः। पुलस्तये च नमः।
नमो गोष्ठ्याय च नमः। गृह्याय च नमः। नम स्तल्प्याय च नमः। गेह्याय च नमः।
नमः काट्याय च नमः। गह्वरेष्ठाय च नमः। नमो ह्रदय्याय च नमः।
निवेष्प्याय च नमः। नमः पाꣳसव्याय च नमः। रजस्याय च नमः।
नमः शुष्क्याय च नमः। हरित्याय च नमः। नमो लोप्याय च नमः।
उलप्याय च नमः। नम ऊर्व्याय च नमः। सूर्म्याय च नमः। नमः पर्ण्याय च नमः।
पर्णशद्याय च नमः। नमोपगुरमाणाय च नमः। अभिघ्नते च नमः।
नम आक्खिदते च नमः। प्रक्खिदते च नमः। नमो वो नमः।
किरिकेभ्यो नमः।देवानाꣳ हृदयेभ्यो नमः। नमो विक्षीणकेभ्यो नमः।
नमो विचिन्वत्केभ्यो नमः। नम आनिर्हतेभ्यो नमः। नम आमीवत्केभ्यो नमः।

॥ प्रदक्षिणम् ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।

एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् ॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥

इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् ।

यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।

यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामितोऽवधी र्हविष्मन्तो नमसा विधेम ते ॥

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।

रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममभमुपहत्नुमुग्रम् ।

मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेना ॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥

विकिरिद् विलोहित नमस्ते अस्तु भगवः ।

यास्ते सहस्र२ं हेतयोन्यमस्मन्निवपन्तु ताः ॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।

तासामीशानो भगवः पराचीना मुखा कृधि ॥

## ॥ नमस्कारम् ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

नीलग्रीवाः शितिकण्ठाः शर्वा अधः , क्षमाचराः ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

नीलग्रीवाः शितिकण्ठा दिव२ं रुद्रा उपश्रिताः ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषा२ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

ये पथां पथिरक्षय ऐलबृदा यव्युधः ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

य एतावन्तश्च भूयाँसश्च दिशो रुद्रा वितस्थिरे ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

नमो रुद्रेभ्यो ये पृथिव्यां येषा मन्नं मिषवस्तेभ्यो

दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो

नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

नमो रुद्रेभ्यो येन्तरिक्षे येषा वात मिषवस्तेभ्यो

दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो

नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

नमो रुद्रेभ्यो ये दिवि येषा वर्ष मिषवस्तेभ्यो

दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो

नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ।

तेषाँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ महादेवादिभ्यो रुद्रेभ्यो नमः ।

## ॥ प्रार्थना ॥ (Chant Chamaka from 1 to 11)

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् ॥ वाजश्च मे ०००००००१

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे ०००००००२

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे ०००००००३

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे ०००००००४

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे ०००००००५

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे ०००००००६

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मे ०००००००७

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ०००००००८

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे ०००००००९

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे ०००००००१०

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे ०००००००११

ॐ महादेवादिभ्यो रुद्रेभ्यो नमः । समस्तोपचारान् समर्पयामि ॥

# ॥ श्री रुद्रप्रश्नः ॥

## ॥ ओं नमो भगवते रुद्राय ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ । अंगुष्ठाभ्यां नमः ।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथाय नमः
सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ । तर्जनीभ्यां नमः ।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ । मध्यमाभ्यां नमः ।

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ । अनामिकाभ्यां नमः ।

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपति र्ब्रह्मणोऽधिपति र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ । कनिष्ठिकाभ्यां नमः ।

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये
अम्बिकापतय उमापतये पशुपतये नमो नमः ॥ । करतलकरपृष्ठाभ्यां नमः ।

॥ न्यासः ॥

असय श्री रुद्राध्याय प्रश्न महा मन्त्रस्य ,

अघोर ऋषिः , अनुष्ठुप् छंदः ,

संकर्षणमूर्ति स्वरूपो योसावादित्यः परम पुरुषः स एष रुद्रो देवता ।

नमश्शिवायेति बीजम् । शिवतरायेति शक्तिः । महा देवायेति कीलकम् ।

श्री सांब सदाशिव प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

॥ करन्यासः ॥

ओं अग्निहोत्रात्मने अंगुष्ठाभ्यां नमः ।

दर्श पूर्ण मासात्मने तर्जनीभ्यां नमः ।

चातुर्मास्यात्मने मध्यमाभ्यां नमः ।

निरूढ पशुबंधात्मने अनामिकाभ्यां नमः ।

ज्योतिष्टो मात्मने कनिष्ठिकाभ्यां नमः ।

सर्व क्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ।

॥ हृदयादि अंगन्यासः ॥

अग्निहोत्रात्मने हृदयाय नमः ।

दर्श पूर्ण मासात्मने शिरसे स्वाहा ।

चातुर्मास्यात्मने शिखायै वषट् ।

निरूढ पशुबंधात्मने कवचाय हुम् ।

ज्योतिष्टो मात्मने नेत्रत्रयाय वौषट् ।

सर्व क्रत्वात्मने अस्त्राय फट् ।

भूर्भुवस्सुवरोमिति दिग्भंधः ॥

॥ ध्यानम् ॥

आपाताळ नभः स्थलान्त भुवन ब्रह्माण्ड माविस्फुरत्

ज्ज्योतिः स्फाटिक लिङ्ग मौळि विलसत् पूर्णेन्दु वान्तामृतैः ।

असतोकाप्लुत मेकमीश मनिशं रुद्रानुवाका ञ्जपन्

ध्याये दीप्सित सिद्धयेऽध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

पीठं यस्य धरित्री जलधर कलशं लिङ्ग माकाश मूर्तिं

नक्षत्रं पुष्पमाल्यं ग्रहगण कुसुमं चन्द्रवह्न्यर्क नेत्रम् ।

कुक्षिः सप्त समुद्रं भुजगिरि शिखरं सप्त पातालपातं

वेदं वक्त्रं षडङ्गं दशदिशि वसनं दिव्य लिङ्गं नमामि ॥

ब्रह्माण्ड व्याप्त देहा भसित हिमरुचा भासमाना भुजङ्गैः

कण्ठे कालाः कपर्दा कलित शशिकला श्चण्डकोदण्ड हस्ताः ।

त्र्यक्षा रुद्राक्ष मालाः प्रणत भयहराः (प्रकटितविभवाः) शांभवा मूर्तिभेदाः

रुद्राः श्री रुद्रसूक्त प्रकटितविभवाः नः प्रयच्छन्तु सौख्यम् ॥

॥ श्री महा गणपति ध्यानम् ॥

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमं ।

ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत आ नः श्रृण्वन्नूतिभिस्सीद सादनं ॥

॥ ॐ श्री महागणपतये नमः ॥

॥ शान्तिपाठः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे

भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे

संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे

लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे

जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे

सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

# ॥ नमकम् ॥

## ॥ श्री रुद्रप्रश्नः ॥

॥ ॐ नमो भगवते रुद्राय ॥

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवम् बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥
यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥
शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ॥
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ।
प्रमुञ्च धन्वनस्त्व-मुभयोरार्त्नियोर्ज्याम् ॥
याश्च ते हस्त इषवः परा ता भगवो वप ।
अवतत्य धनुस्तवꣳ सहस्राक्ष शतेषुधे ॥
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ॥
अनेशन्नस्येषव आभुरस्य निषङ्गथिः ।
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ।
नमस्ते अस्त्वायुधायानातताय धृष्णवे ॥
उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने ।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ।
नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय
नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय
सदाशिवाय श्रीमन्महादेवाय नमः ॥१॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो

नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो

नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो

नमो हरिकेश्योपवीतिने पुष्टाणं पतये नमो

नमो भवस्य हेत्यै जगतां पतये नमो

नमो रुद्रायाततताविने क्षेत्राणां पतये नमो

नम स्सूतायाहन्त्याय वनानां पतये नमो

नमो रोहिताय स्थपतये वृक्षाणं पतये नमो

नमो मन्त्रिणे वाणिजाय कक्षाणं पतये नमो

नमो भुवंतये वारिवस्कृधायौषधीनां पतये नमो

नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम् पतये नमो

नमः कृथ्त्नवीताय धावते सत्वनां पतये नमः ॥२॥

नमः सहमानाय निव्यादिन आव्याधिनीनां पतये नमो

नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो

नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो

नमो निचेरवे परिचरायारण्यानां पतये नमो

नमः सृकाविभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो

नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो

नम उष्णीषिने गिरिचराय कुलुञ्चानां पतये नमो

नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो

नम आतन्वानेभ्य प्रतिदधानेभ्यश्च वो नमो

नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो

नम आसीनेभ्यः शयानेभ्यश्च वो नमो

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो

नमः सभाभ्यः सभापतिभ्यश्च वो नमो

नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥३॥

नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो

नमो गणेभ्यो गणपतिभ्यश्च वो नमो

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो

नमो महद्भ्यः, क्षुल्लकेभ्यश्च वो नमो

नमो रथिभ्योऽरथेभ्यश्च वो नमो

नमो रथेभ्यो रथपतिभ्यश्च वो नमो

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो

नमः, क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो

नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो

नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो

नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥४॥

नमो भवाय च रुद्राय च

नमः शर्वाय च पशुपतये च

नमो नीलग्रीवाय च शितिकण्ठाय च

नमः कपर्दिने च व्युप्तकेशाय च

नमः सहस्राक्षाय च शतधन्वने च

नमो गिरिशाय च शिपिविष्टाय च

नमो मीढुष्टमाय चेषुमते च

नमो ह्रस्वाय च वामनाय च

नमो बृहते च वर्षीयसे च

नमो वृद्धाय च संवृद्वने च

नमो अग्रियाय च प्रथमाय च

नम आशवे चाजिराय च

नमः शीघ्रियाय च शीभ्याय च

नम ऊर्म्याय चावस्वन्याय च

नमः स्रोतस्याय च द्वीप्याय च ॥५॥

नमो ज्येष्ठाय च कनिष्ठाय च

नमः पूर्वजाय चापरजाय च

नमो मध्यमाय चापगल्भाय च

नमो जघन्याय च बुध्नियाय च

नमः सोभ्याय च प्रतिसर्याय च

नमो याम्याय च क्षेम्याय च

नम उर्वर्याय च खल्याय च

नमः श्लोक्याय चाऽवसान्याय च

नमो वन्याय च कक्ष्याय च

नमः श्रवाय च प्रतिश्रवाय च

नम आशुषेणाय चाशुरथाय च

नमः शूराय चावभिन्दते च

नमो वर्मिणे च वरूथिने च

नमो बिल्मिने च कवचिने च

नमः श्रुताय च श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च

नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च

नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च

नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च

नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च
नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च
नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च
नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च
नमो अग्रेवधाय च दूरेवधाय च
नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो
नमस्ताराय नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च
नमः शिवाय च शिवतराय च
नमस्तीर्थ्याय च कूल्याय च
नमः पार्याय चावार्याय च
नमः प्रतरणाय चोत्तरणाय च
नम आतार्याय चालाद्याय च
नमः शष्प्याय च फेन्याय च
नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नम इरिण्याय च प्रपथ्याय च
नमः किꣳशिलाय च क्षयणाय च
नमः कपर्दिने च पुलस्तये च
नमो गोष्ठ्याय च गृह्याय च

नमस्तल्प्याय च गेह्याय च

नमः काट्याय च गह्वरेष्ठाय च

नमो ह्रदय्याय च निवेष्प्याय च

नमः पाꣳसव्याय च रजस्याय च

नमः शुष्क्याय च हरित्याय च

नमो लोप्याय चोलप्याय च

नम ऊर्व्याय च सूर्म्याय च

नमः पर्ण्याय च पर्णशद्याय च

नमोऽपगुरमाणाय चाभिघ्नते च

नम आख्खिदते च प्रख्खिदते च

नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो

नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।

एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् ॥ १०.१ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥ १०.२ ॥

इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । ।

यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १०.३ ॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।

यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥ १०.४ ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ १०.५ ॥
मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी र्हविष्मन्तो नमसा विधेम ते ॥ १०.६ ॥
आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।
रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥ १०.७ ॥
स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममभमुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेना ॥ १०.८ ॥
परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥ १०.९ ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ १०.१० ॥
विकिरिद् विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ॥ १०.११ ॥
सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥ १०.१२ ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११.१ ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ॥ ११.२ ॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः , क्षमाचराः ॥ ११.३ ॥

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ॥ ११.४ ॥

ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ॥ ११.५ ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥ ११.६ ॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥ ११.७ ॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥ ११.८ ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥ ११.९ ॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे

तेषाꣳ सहस्रभयोजनेऽवधन्वानि तन्मसि ॥ ११.१० ॥

नमो रुद्रेभ्यो ये पृथिव्यां येन्तरिक्षे ये दिवि येषामन्नं वातो

वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीची

र्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो

द्वेष्टि तं वो जम्भे दधामि ॥ ११.११ ॥

त्रयंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्यो-र्मुक्षीय माऽमृतात् ॥ १ ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु

यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥ २ ॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।

यक्ष्वामहे सौमनसाय रुद्रं नभोभिर्देवमसुरं दुवस्य ॥ ३ ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।

अयं मे विश्वभेषजोऽयꣳ शिवाभिमर्शनः ॥ ४ ॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

तान् यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ ५॥

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ।

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥ ६ ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ।

॥ ओं शान्तिः शान्तिः शान्तिः ॥

## ॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् ॥
वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥ ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ॥ ३ ॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहियश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामकाश्च मे नीवाराश्च मे ॥ ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म

इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे
वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म
इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे
पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म
इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ॥ ६ ॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म
ऐन्द्रवायश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे
मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मे
ऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म
आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे
हारियोजनश्च मे ॥ ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे
स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे
पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे
पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ॥ ८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मे
ऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्क्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे
साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे
व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ॥ ९ ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे
पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे
धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां
व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां
वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ ॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे
पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे
पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे
त्रयस्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे
चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे
चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च
मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ ॥ ११ ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद्विश्वेदेवाः सूक्तवाचः
पृथिवीमातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमती देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै
पितरोऽनुमदन्तु ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति श्री कृष्णयजुर्वेदीय तैत्तिरीय संहितायां चतुर्थकाण्डे सप्तमः प्रपाठकः ॥

# ॥ शिवाष्टोत्तरशत नामावलिः ॥

कर्पूर-गौरं करुणावतारं संसार-सारं भुजगेन्द्र-हारम्।

सदा वसन्तं हृदयारविन्दं भवं भवानी सहितं नमामि ॥

ॐ शिवाय नमः। ॐ महेश्वराय नमः। ॐ शंभवे नमः। ॐ पिनाकिने नमः।

ॐ शशिशेखराय नमः। ॐ वामदेवाय नमः। ॐ विरूपाक्षाय नमः।

ॐ कपर्दिने नमः। ॐ नीललोहिताय नमः। ॐ शंकराय नमः।

ॐ शूल पाणिने नमः। ॐ खट्वांगिने नमः। ॐ विष्णु वल्लभाय नमः।

ॐ शिपि विष्टाय नमः। ॐ अंबिका नाथाय नमः। ॐ श्री कण्ठाय नमः।

ॐ भक्त वत्सलाय नमः। ॐ भवाय नमः। ॐ शर्वाय नमः।

ॐ त्रिलोकेशाय नमः। ॐ शिति कण्ठाय नमः। ॐ शिव प्रियाय नमः।

ॐ उग्राय नमः। ॐ कपालिने नमः। ॐ कामारये नमः।

ॐ अन्धका सुर सूदनाय नमः। ॐ गंगाधराय नमः। ॐ ललाटाक्षाय नमः।

ॐ कलि कालाय नमः। ॐ कृपा निधये नमः। ॐ भीमाय नमः।

ॐ परशु हस्ताय नमः। ॐ मृग पाणये नमः। ॐ जटा धराय नमः।

ॐ कैलाश वासिने नमः। ॐ कवचिने नमः। ॐ कठोराय नमः।

ॐ त्रिपुरान्त काय नमः। ॐ वृषंगिणे नमः। ॐ वृषभा रूढाय नमः।

ॐ भस्मोद् धूलित विग्रहाय नमः। ॐ साम प्रियाय नमः। ॐ स्वरमयाय नमः।

ॐ त्रयीमूर्तये नमः। ॐ अनीश्वराय नमः। ॐ सर्वज्ञाय नमः। ॐ परमात्मने नमः।

ॐ सोम सूर्याग्नि लोचनाय नमः। ॐ हविषे नमः। ॐ यज्ञमयाय नमः।

ॐ सोमाय नमः। ॐ पंचवक्राय नमः। ॐ सदाशिवाय नमः। ॐ विश्वेश्वराय नमः।

ॐ वीरभद्राय नमः। ॐ गण नाथाय नमः। ॐ प्रजापतये नमः।

ॐ हिरण्य रेतसे नमः। ॐ दुर्धर्षाय नमः। ॐ गिरीशाय नमः। ॐ गिरिशाय नमः।

ॐ अनघाय नमः। ॐ भुजंग भूषणाय नमः। ॐ भर्गाय नमः।

ॐ गिरि धन्वने नमः। ॐ गिरि प्रियाय नमः। ॐ कृत्ति वाससे नमः।

ॐ पुरा रातये नमः। ॐ भगवते नमः। ॐ प्रमथा धिपाय नमः।

ॐ मृत्युंजयाय नमः। ॐ सूक्ष्म तनवे नमः। ॐ जग द्व्यापिने नमः।

ॐ जगद्गुरुवे नमः। ॐ व्योमकेशाय नमः। ॐ महासेन जनकाय नमः।

ॐ चारु विक्रमाय नमः। ॐ रुद्राय नमः। ॐ भूतपतये नमः। ॐ स्थाणवे नमः।

ॐ अहि बुंध्न्याय नमः। ॐ दिगंबराय नमः। ॐ अष्टमूर्तये नमः।

ॐ अनेकात्मने नमः। ॐ सात्विकाय नमः। ॐ शुद्ध विग्रहाय नमः।

ॐ शाश्वताय नमः। ॐ खण्डपरशवे नमः। ॐ रजसे नमः।

ॐ पाशविमोचनाय नमः। ॐ मृडाय नमः। ॐ पशुपतये नमः।

ॐ देवाय नमः। ॐ महादेवाय नमः। ॐ अव्ययाय नमः। ॐ हरिपूषणे नमः।

ॐ दन्तभिदे नमः। ॐ त्रिलोचनाय नमः। ॐ अव्यग्राय नमः।

ॐ दक्षाध्वर हराय नमः। ॐ हराय नमः। ॐ भगनेत्रभिदे नमः।

ॐ अव्यक्ताय नमः। ॐ सहस्राक्षाय नमः। ॐ सहस्रपदे नमः।

ॐ अपवर्गप्रदाय नमः। ॐ अनन्ताय नमः। ॐ तारकाय नमः।

ॐ परमेश्वराय नमः।

॥ इति श्रीशिवाष्टोत्तरशत नामावलिः॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 1 ]

यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानꣳ सनो देवश्शुभया स्मृत्या स्सय्युनक्तु ॥

यस्मात्पर न्नापरमस्ति किञ्चिद्यस्मा न्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिव तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकन्निहितङ्गुहाया विभ्राजदेतद्यतयो विशन्ति ॥

वेदान्त विज्ञान सुनिश्चितार्था स्सन्यास योगाद्यतय श्शुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्त काले परामृतात्परिमुच्यन्ति सर्वे ॥

दह्र विपापं परमेश्मभूतं य्यत्पुण्डरीकं पुरमद्ध्य सꣳ स्थम् ।
तत्रापि दह्रङ्गगनं विवशोक स्तस्मिन् यदन्तस्तदुपासितव्यम् ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथाय नमः
सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

सर्वेभ्य स्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात् ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां

ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्रयम्बकाय

त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 2 ]

ब्रह्मण एकहोता । स यज्ञः ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । यज्ञश्च मे भूयात् ॥

अग्निर्द्धि होता । स भर्ता ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । भर्ता च मे भूयात् ॥

पृथिवी त्रिहोता । स प्रतिष्ठा ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । प्रतिष्ठा च मे भूयात् ॥

अन्तरिक्षं चतुर् होता । स विष्ठाः ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । विष्ठाश्च मे भूयात् ॥

वायुः पञ्च होता । स प्राणः ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । प्राणश्च मे भूयात् ॥

चन्द्रमा ष्षड्ढोता । स ऋतून् कल्पयाति ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । ऋतवश्च मे कल्पन्ताम् ॥

अन्नꣳ सप्त होता । स प्राणस्य प्राणः ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । प्राणस्य च मे प्राणो भूयात् ॥

द्यौ रष्ट होता । सोऽनाधृष्यः ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । अनाधृष्यश्च भूयासम् ॥

आदित्यो नव होता । स तेजस्वी ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । तेजस्वी च भूयासम् ॥

प्रजापति र्दश होता । स इदꣳ सर्वम् ।

स मे ददातु प्रजां पशून् पुष्टिं यशः । सर्वं च मे भूयात् ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय

त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

## ॥ रुद्र दीपाराधन मन्त्राः ॥ [ 3 ]

एष वै विभू र्नाम यज्ञः । सर्वꣳ ह वै तत्र विभू र्भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै प्रभू र्नाम यज्ञः । सर्वꣳ ह वै तत्र प्रभु र्भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै ऊर्जस्वान्नाम यज्ञः । सर्वꣳ ह वै तत्रोर्जस्व द्भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै पयस्वान्नाम यज्ञः । सर्वꣳ ह वै पयस्व द्भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै विधृतो नाम यज्ञः । सर्वꣳ ह वै तत्र विधृतं भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै व्यावृत्तो नाम यज्ञः । सर्वꣳ ह वै तत्र व्यावृत्तं भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै प्रतिष्ठितो नाम यज्ञः । सर्वꣳ हवै तत्र प्रतिष्ठितं भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै तेजस्वी नाम यज्ञः । सर्वꣳ ह वै तत्र तेजस्वि भवति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै ब्रह्मवर्चसी नाम यज्ञः । आह वै तत्र ब्रह्मवर्चसी जायते । यत्रैतेन यज्ञेन यजन्ते ।

एष वा अतिव्याधी नाम यज्ञः । आह वै तत्र राजन्योऽतिव्याधी जायते ।
यत्रैतेन यज्ञेन यजन्ते ।

एष वै दीर्घो नाम यज्ञः । दीर्घायुषो ह वै तत्र मनुष्या भवन्ति । यत्रैतेन यज्ञेन यजन्ते ।

एष वै क्लृप्तो नाम यज्ञः । कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः ।
यत्रैतेन यज्ञेन यजन्ते ।

# ॥ शिव पञ्चायतन पूजायां धूपाद्युपचारः ॥

## धूपः

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धू-र्वयं वयं

धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं

देवहूतम मह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वामित्रस्य त्वा

चक्षुषा प्रेक्षे मा भे र्मा संविक्था मा त्वा हिꣳसिषम् ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः । धूपम् आघ्रापयामि ।

## दीपः

उद्दीप्यस्व जातवेदोऽपघ्न न्निरृतिं मम ।

पशूꣳश्च मह्यमावह जीवनं च दिशो दिश ॥

मा नो हिꣳसी ज्जातवेदो गामश्वं पुरुषं जगत् ।

अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

दीपं दर्शयामि । धूप दीपा नंतरं आचमनीयं समर्पयामि ॥

## नैवेद्यम्

ओं भूः भुवः स्सुवः । ओं तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥ देव सवितः प्रसुव । सत्यं त्वर्तेन परिषिंचामि ।

अमृतोपस्तरणमसि । ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय

स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा ।

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्तवोषधीः ॥

मधुनक्त मुतोपसि मधुमार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥

मधुमान्नो वनस्पति र्मधुमाꣳ अस्तु सूर्यः ।

माध्बीर्गावो भवन्तु नः । मधु मधु मधु ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

दिव्यान्नं घृतगुळपायसं नालिकेर खण्डद्वयं कदलीफलं महा नैवेद्यं निवेदयामि ।

मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि ।

हस्त प्रक्षालनं समर्पयामि । पाद प्रक्षालनं समर्पयामि ।

आचमनियं समर्पयामि ॥

पूगीफलसमायुक्तं नागवल्लीदलैर्यतम् ।

कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

कर्पूर ताम्बूलं निवेदयामि । समस्तोपचारान् समर्पयामि ॥

## पञ्चमुखदीपं

सप्रथ सभां मे गोपाय । ये च सभ्याः सभासदः ।

तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् ।

अहे बुध्नियमन्त्रं मे गोपाय । यमृषय-स्त्रैविदा विदुः ।

ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ॥

पञ्च हूतो ह वै नामैषः । तं वा एतं पञ्च हूतꣳ सन्तम् ।

पञ्च होतेत्या चक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

पञ्चमुखदीपं दर्शयामि । आचमनीयं समर्पयामि ॥

## कर्पूर नीराजनम्

सोमो वा एतस्य राज्यमादत्ते । यो राजा सन् राज्यो वा सोमेन यजते ।

देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानꣳसवाः ।

त एवास्मै सवान् पयच्छन्ति । त एनं पुनः सुवन्ते राज्याय ।

देवसूराजा भवति ।

साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यꣳराज्यं महाराज्यमाधिपत्यम् ॥

यो वैतां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् ।

तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः ॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुताऽयमग्नि ।

तमेव भान्त मनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

सर्वोपवारार्थे कर्पूरमंगळनीराजनं सन्दर्शयामि ।

बृहत्साम क्षत्रभृद् वृद्ध वृष्णियं । त्रिष्टुभौज श्शुभित मुग्र चीरम् ।

इन्द्रस्तोमेन पंचदशेन मध्य मिदं वातेन सगरेण रक्ष ॥

रक्षां धारयामि ॥

## मन्त्रपुष्पम्

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।

चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।

आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ।

वेदोक्त मन्त्रपुष्पम् समर्पयामि ॥

## सुवर्णपुष्पम्

राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कूर्महे ।

समे-का-मान्-का-म कामाय मह्यं कामेश्वरो वैश्रवणो दधातु ।

कुबेराय वैश्रवणाय महाराजाय नमः ॥

सुवर्णपुष्पम् समर्पयामि ॥ पारिजातपुष्पम् समर्पयामि ॥

## प्रदक्षिणम्

यानि कानि च पापानि जन्मांतर कृतानि च ।

तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

प्रकृष्ट पाप नाशाय प्रकृष्टफलसिद्धये । प्रदक्षिणं करोमीश प्रसीद परमेश्वर ॥

# ॥ श्री शिव पूजा ॥

बहु धान्य नाम संवत्सरे उत्तरायणे शिशिर ऋतौ माघ मासे

कृष्ण पक्षे त्रयोदशी तिथौ उत्तराषाडा नक्षत्रे रवि वासरे

**At the regular Altar**

ॐ सर्वेभ्यो गुरुभ्यो नमः। ॐ सर्वेभ्यो देवेभ्यो नमः।

ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥ प्रारंभ कार्यं निर्विघ्नमस्तु। शुभं शोभनमस्तु।

इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु॥

अनुज्ञां देहि॥

**At the shiva Altar**

**आचमनः** (Sip one spoon of water after each mantra)

ॐ केशवाय स्वाहा। ॐ नारायणाय स्वाहा। ॐ माधवाय स्वाहा।

(Now we chant the 21 names of the Lord, in order to concentrate on the Lord)

ॐ गोविंदाय नमः। ॐ विष्णवे नमः। ॐ मधुसूदनाय नमः।

ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः।

ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः।

ॐ सङ्कर्षणाय नमः। ॐ वासुदेवाय नमः। ॐ प्रद्युम्नाय नमः।

ॐ अनिरुद्धाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ अधोक्षजाय नमः।

ॐ नारसिंहाय नमः। ॐ अच्युताय नमः। ॐ जनार्दनाय नमः।

ॐ उपेंद्राय नमः। ॐ हरये नमः।

श्री कृष्णाय नमः॥

**प्राणायामः**

ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता। दैवी गायत्री छन्दः।

प्राणायामे विनियोगः॥

ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यम्।

ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही धियो यो नः प्रचोदयात्॥

**पुनराचमन** (Repeat Achamana - given above)

ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम्॥

(Apply water to eyes and understand that you are of the nature of Brahman)

**सङ्कल्पः**

ॐ श्रीमान् महागणाधिपतये नमः। श्री गुरुभ्यो नमः। श्री सरस्वत्यै नमः।

श्री वेदाय नमः। श्री वेदपुरुषाय नमः।

इष्टदेवताभ्यो नमः। (Prostrations to your favorite deity)

कुलदेवताभ्यो नमः। (Prostrations to your family deity)

स्थानदेवताभ्यो नमः। (Prostrations to the deity of this house)

ग्रामदेवताभ्यो नमः। (Prostrations to the deity of this place)

वास्तुदेवताभ्यो नमः। (Prostrations to the deity of all the materials we have collected)

शचीपुरंदराभ्यां नमः। (Prostrations to the Indra and shachii)

उमामहेश्वराभ्यां नमः। (Prostrations to Shiva and Parvati)

मातापितृभ्यां नमः। (Prostrations to our parents)

लक्ष्मीनारायणाभ्यां नमः।(Prostrations to the Lords Lakshmi & Narayana)

सर्वेभ्यो देवेभ्यो नमो नमः। (Prostrations to all the Gods)

सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः। (Prostrations to all Brahamanas - in the religious path)

येतद्कर्मप्रधान देवताभ्यो नमो नमः।(Prostration to Lord Shiva the main deity)

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।

लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥

धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।

द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।

संग्रामे सङ्कटेश्चैव विघ्नः तस्य न जायते ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।

शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् ।

येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।

विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।

येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।

सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य

अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे

वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे दण्डकारण्य देशे

गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे तीरे परशुराम क्षत्रे

सम्युक्त ०००००००००० देशे ०००००००००० ग्रामे शालिवाहन शके

वर्तमाने व्यवहारिके बहु धान्य नाम संवत्सरे उत्तरायणे शिशिर ऋतौ

माघ मासे कृश्ण पक्षे त्रयोदसि तिथौ उत्तराशाड नक्षत्रे रवि वासरे

सर्व ग्रहेषु यथा राशि स्थान स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां

शुभपुण्यतिथौ मम आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं

मम सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषात्र्थ सिध्यर्थं

अंगीकृत श्री शिवरात्रि व्रतांगत्वेन संपादित सामग्रय्य

श्रीगणेश वरुण इंद्रादि अष्टलोकपाल गणपति चतुष्ट देवता पूजनपूर्वकं

श्री शिव प्रीत्यर्थं यथा शक्त्या यथा मिलितोपचार द्रव्यैः पुरुषसूक्त

पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारे श्री शिव पूजनं करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।

तेन मे सफलावाप्तिर् भवेत् जन्मनि जन्मनि ॥

(keep fruits in front of the Lord)

## शिव पञ्चाक्षरी न्यास

(touching various parts of the body)

॥ ॐ ॥ अस्य श्री शिव पञ्चाक्षरी मन्त्रस्य वामदेव ऋषिः । अनुष्टुप् छन्दः ।

श्री सदाशिवो देवता । श्री सदाशिव प्रीत्यर्थे न्यासे पूजने च विनियोगः ॥

वामदेव ऋषये नमः । शिरसे स्वाहा ॥ (touch the head)

अनुष्टुप् छन्दसे नमः । मुखे स्वाहा ॥ (touch face)

श्री सदाशिव देवतायै नमः। ललाटे स्वाहा ॥ (touch the forehead)

ॐ नं तत्पुरुषाय नमः। हृदये स्वाहा ॥ ( touch the heart)

ॐ मं अघोराय नमः। पादयो स्वाहा ॥ (touch feet)

ॐ शिं सद्योजाताय नमः। गुह्ये स्वाहा ॥ (touch groin)

ॐ वं वामदेवाय नमः। मूर्ध्नि स्वाहा ॥ (touch top of the skull )

ॐ यं ईशानाय नमः। श्रोत्रे स्वाहा ॥ (touch ears)

ॐ ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मं शिखायै वौषट्।

ॐ शिं कवचाय हुं। ॐ वं नेत्रत्रयाय वौषट्। ॐ यं अस्त्राय फट्।

**दिग्बन्धन** ( show mudras)

ॐ अघोरष्ट्रेन इति दिग्बन्धः। दिशो बद्नामि ॥

**गणपति पूजा आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये।**

ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगति गणपत्यावाहने विनियोगः॥
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे। कविं कविनामुपम श्रवस्तमम्।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत। आनः शृण्वन्नूतिभिः सीदसादनम्॥

भूः गणपतिं आवाहयामि। भुवः गणपतिं आवाहयामि।

स्वः गणपतिं आवाहयामि। ॐ भूर्भुवस्वः महागणपतये नमः।

ध्यायामि। ध्यानं समर्पयामि।

ॐ महागणपतये नमः। आवाहनं समर्पयामि।

ॐ महागणपतये नमः। आसनं समर्पयामि।

ॐ महागणपतये नमः। पाद्यं समर्पयामि।

ॐ महागणपतये नमः। अर्घ्यं समर्पयामि।

ॐ महागणपतये नमः। आचमनीयं समर्पयामि।

ॐ महागणपतये नमः। स्नानं समर्पयामि।

ॐ महागणपतये नमः। वस्त्रं समर्पयामि।

ॐ महागणपतये नमः। यज्ञोपवीतं समर्पयामि।

ॐ महागणपतये नमः। चंदनं समर्पयामि।

ॐ महागणपतये नमः। परिमल द्रव्यं समर्पयामि।

ॐ महागणपतये नमः। पुष्पाणि समर्पयामि।

ॐ महागणपतये नमः। धूपं समर्पयामि।

ॐ महागणपतये नमः। दीपं समर्पयामि।

ॐ महागणपतये नमः। नैवेद्यं समर्पयामि।

ॐ महागणपतये नमः। ताम्बूलं समर्पयामि।

ॐ महागणपतये नमः। फलं समर्पयामि।

ॐ महागणपतये नमः। दक्षिणां समर्पयामि।

ॐ महागणपतये नमः। आर्तिक्यं समर्पयामि।

ॐ भूर्भुवस्वः महागणपतये नमः। मन्त्रपुष्पं समर्पयामि।

ॐ भूर्भुवस्वः महागणपतये नमः। प्रदक्षिणा नमस्कारान् समर्पयामि।

ॐ भूर्भुवस्वः महागणपतये नमः। छत्रं समर्पयामि।

ॐ महागणपतये नमः। चामरं समर्पयामि।

ॐ महागणपतये नमः। गीतं समर्पयामि।

ॐ महागणपतये नमः। नृत्यं समर्पयामि।

ॐ महागणपतये नमः । वाद्यं समर्पयामि ।

ॐ महागणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥

ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा ।

निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महागणपति प्रीयताम् ॥

**दीप स्थापना अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।**

अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥ (light the lamps)

**भूमि प्रार्थना**

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां पिप्रतान्नो भरीमभिः ॥

**धान्य राशि**

ॐ औषधाय संवदंते सोमेन सहराज्ञ । यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥

(Touch the grains/rice/wheat)

**कलश स्थापना**

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते उक्तैर्यज्ञेषु वर्धते ॥

(keep kalasha on top of rice pile)

ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।

असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥ (fill kalasha with water)

ॐ गंधद्वारां धुरादर्शां नित्य पुष्टां करीषिणीम् ।

ईश्वरीं सर्व भूतानां तामि होपह्वयेश्रियम् ॥ (sprinkle in/apply ga.ndha to kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।

बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ॥ (put beetle nut in kalasha)

ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः ।

तंभागं चित्रमीमहे ॥ (put jewels / washed coin in kalasha)

ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।

हिरण्ययात् परियोनेर् निषद्या हिरण्यदा ददत्यन् नमस्मै ॥

(put gold / dakShina in kalasha)

ॐ काण्डात् काण्डात् परोहंति परुषः परुषः परि एवानो

दूर्वे प्रतनु सहस्त्रेण शतेन च ॥ (put duurva / karika )

ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।

गो भाज इत्किला सथयत्स नवथ पूरुषम् ॥ (put five leaves in kalasha)

ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।

बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ॥ (place coconut on kalasha)

ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।

तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः ॥

(tie cloth for kalasha)

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।

वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥ (copper plate and ashtadala with kunkum)

इति कलशं प्रतिष्ठापयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**कलश पूजन** (continue with second kalasha)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।

मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥

कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।

ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥

अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।

अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगधे तत्राप्लुता सोदिवमुत्पतंति ।

ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् ।

योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।

अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः । सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥ (Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा । अमृति करणार्थे धेनु मुद्रा ।

पवित्री करणार्थे शङ्ख मुद्रा । संरक्षणार्थे चक्र मुद्रा ।

विपुलमाया करणार्थे मेरु मुद्रा ।

**शङ्ख पूजन** (pour water from kalasha to shankha add gandha flower)

शङ्खं चंद्रार्क दैवतं मध्ये वरुण देवताम् ।

पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीम् ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।

नमितः सर्व देवैश्च पाञ्चजन्यं नमोऽस्तुते ॥

पाञ्चजन्याय विद्महे । पावमानाय धीमहि । तन्नो शङ्खः प्रचोदयात् ॥

शङ्ख देवताभ्यो नमः । सकल पूजार्थे अक्षतान् समर्पयामि ॥

**घंटार्चना** (Pour drops of water from sha.nkha on top of the bell apply gandha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम् ।

कुरु घंटारवं तत्र देवतावाहन लांछनम् ॥

ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।

राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत् ।

तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् । घंटा देवताभ्यो नमः ।

सकल पूजार्थे अक्षतान् समर्पयामि ॥ (Ring the gha.nTaa)

**आत्मशुद्धि** ( Sprinkle water from sha.nkha on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।

यः स्मरेत् पुण्डरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

**गोशृन्ग पूजा**

वायव्ये अर्घ्यम् । नैऋत्ये पाद्यम् । ईशान्ये आचमनीयम् ।

आग्नेये मधुपर्कम् । पूर्वे स्नानीयम् । पश्चिमे पुनराचमनम् ।

**पञ्चामृत पूजा** ( put tulasi leaves or axataas in vessels )

क्षीरे सोमाय नमः । (keep milk in the centre)

दधिनि वायवे नमः । (curd facing east )

घृते रवये नमः । (Ghee to the south)

मधुनि सवित्रे नमः । ( Honey to west )

शर्करायां विश्वेभ्यो देवेभ्यो नमः । ( Sugar to north)

### द्वारपालक पूजा

पूर्वद्वारे द्वारश्रियै नमः। असितांग भैरवाय नमः।

रुरु भैरवाय नमः। दक्षिणद्वारे द्वारश्रियै नमः। चण्ड भैरवाय नमः।

क्रोध भैरवाय नमः। पश्चिमद्वारे द्वारश्रियै नमः। उन्मत्तभैरवाय नमः।

कपाल भैरवाय नमः। उत्तरद्वारे द्वारश्रियै नमः। भीषणभैरवाय नमः।

संहार भैरवाय नमः। ब्रह्मणे नमः। विष्णवे नमः। गङ्गायै नमः। गणपतये नमः।

षण्मुखाय नमः। भृङ्गिनाथाय नमः। क्षेत्रपालाय नमः। त्रिपुरसंहर्त्रे नमः।

शान्तिये नमः। तुष्टिये नमः। ज्ञानाय नमः। धर्माय नमः। वैराग्याय नमः।

वीर्याय नमः। सत्याय नमः। अज्ञानाय नमः। अधर्माय नमः। अनैश्वर्याय नमः।

असत्याय नमः। अविराज्ञाय नमः। सत्त्वाय नमः। रजसे नमः। तमसे नमः।

मायाय नमः। पद्माय नमः॥ द्वारपालक पूजां समर्पयामि॥

### पीठ पूजा

आधार शक्त्यै नमः॥ मूलप्रकृते नमः॥ वराहाय नमः॥ अनन्ताय नमः॥

पद्माय नमः॥ नालाय नमः॥ कन्दाय नमः॥ कर्णिकाय नमः॥

पत्रेभ्यो नमः॥ दलेभ्यो नमः॥ केसरेभ्यो नमः॥

मध्ये श्री भवानि शंकराय नमः। पीठ पूजां समर्पयामि॥

### ध्यानं

ॐ ॐ (repeat 15 times)

ध्यायेत् नित्यं महेशं रजतगिरि निभिं चारु चन्द्रावतंसम्।

रत्नाकल्पोज् ज्वलांगं परशुमृगवरा भीति हस्तं प्रसन्नम्॥

पद्मासीनं समन्तात् स्तुतममरगण्येः व्याघ्रकृतिं वसानम्।

विश्वाद्यं विश्ववन्द्यं निखिल भय हरं पंच वक्रं त्रिनेत्रम् ॥

श्री साम्बसदाशिवाय नमः । श्री सदाशिवं ध्यायामि ॥

(you can add more related shlokas)

**आवाहन** ( hold flowers in hand)

व्याघ्र चर्मधरं देवं चिति भस्मनुलेपनम् ।

अह्वायां उमाकान्तं नागाभरण भूषितम् ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

आगच्छ देवदेवेश तेजोराशे जगत्पते ।

क्रियमाणां मया पूजां गृहाण सुरसत्तमे ॥

ॐ भूः पुरुषं साम्बसदाशिवं आवाहयामि ।

ॐ भुवः पुरुषं साम्बसदाशिवं आवाहयामि ।

ॐ स्वः पुरुषं साम्बसदाशिवं आवाहयामि ।

ॐ भूर्भुवः स्वः साम्बसदाशिवं आवाहयामि ॥ (offer flowers to Lord)

ॐ उमाकान्ताय नमः । आवाहयामि ॥ आवाहितो भव । स्थापितो भव ।

सन्निहितो भव । सन्निरुद्धो भव । अवकुण्ठिथो भव । सुप्रीतो भव ।

सुप्रसन्नो भव । सुमुखो भव । वरदो भव । प्रसीद प्रसीद ॥ (show mudras to Lord)

स्वामिन् सर्व जगन्नाथ यावत् पूजावसानकं ।

तावत्त्वं प्रीति भावेन लिंगेस्मिन् सन्निधो भव ॥

**आसनं**

पुरुष एवेदगुं सर्वम् यद्भूतं यच्छ भव्यम् ।

उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

दिव्य सिंहास नासीनं त्रिनेत्रं वृषवाहनं ।

इन्द्रादि देवनमितं ददाम्यासन मुत्तमं ॥

ॐ गौरि भर्त्रे नमः । आसनं समर्पयामि ॥ (offer flowers/axathaas)

**पाद्यं** (offer water)

एतावानस्य महिमा अतो ज्यायागुंश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

गङ्गादि सर्व तीर्थेभ्यो मया प्रार्थनया हृतम् ।

तोयमे तत् सुख स्पर्शं पाद्यर्थं प्रतिगृह्यताम् ॥

ॐ गङ्गाधराय नमः । पादोयो पाद्यं समर्पयामि ॥

**अर्घ्यं** (offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।

ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना ।

अर्घ्यं गृहाण देवेश भक्ति मे अचलां कुरु ॥

ॐ वृष वाहनाय नमः । अर्घ्यं समर्पयामि ॥

**आचमनीयं** (offer water or akShathaa/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः ।

स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः ॥

कर्पूरोक्षीर सुरभि शीतलं विमलं जलं ।

गङ्गायास्तु समानीतं गृहाणाचमनीयकं ॥

ॐ साध्यो जाताय नमः। आचमनीयं समर्पयामि ॥

**मधुपर्कं**

**नमोस्तु सर्वलोकेश उमादेहार्ध धारिणे।**

**मधुपर्को मया दत्तो गृहाण जगदीश्वर ॥**

ॐ परमेश्वराय नमः। मधुपर्कं समर्पयामि ॥

**स्नानं**

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

गंगाच यमुनाश्चैव नर्मदाश्च सरस्वति।

तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतम् ॥

ॐ श्री विश्वेश्वराय नमः। मलापकर्श स्नानं समर्पयामि ॥

**पञ्चामृत स्नानं**

**पयः स्नानं** (milk bath)

ॐ आप्याय स्व स्वसमेतुते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्धे ॥

पयस्नानमिदं देव त्रिलोचन वृषद्वज।

गृहाण गौरीरमण त्वद्भक्तेन मय्यार्पितम् ॥

ॐ शम्भवे नमः। पयः स्नानं समर्पयामि ॥

पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**दधि स्नानं** (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः।

सुरभिनो मुखाकरत् प्राण आयुंषितारिषत् ॥

दध्न चैव महादेव स्वप्नं क्रीयते मया ।

गृहाण त्वं सुरादीश सुप्रसन्नो भवाव्यय ॥

ॐ वामदेवाय नमः । दधि स्नानं समर्पयामि ॥

दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**घृत स्नानं** (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम

अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम् ॥

सर्पीश च महारुद्र स्वप्नं क्रीयते दुन ।

गृहाण श्रद्धया दत्तं तव प्रीतार्थमेव च ॥

ॐ अघोराय नमः । घृत स्नानं समर्पयामि ॥

घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**मधु स्नानं** (honey bath)

ॐ मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः संतोष्वधीः

मधुनक्ता मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पिता

मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

इदं मधु मया दत्तं तव पुष्ट्यर्थमेव च ।

गृहाण देवदेवेश ततः शान्तिं प्रयश्च मे ॥

ॐ तत् पुरुषाय नमः । मधु स्नानं समर्पयामि ॥

मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**शर्करा स्नानं** (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु नाम्ने ।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

सिथया देव देवेश स्नापनं क्रीयते यतः ।

ततः संतुष्टिमापन्नः प्रसन्नो वरदो भव ॥

ॐ ईशानाय नमः । शर्करा स्नानं समर्पयामि ।

शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि । सकल पूजार्थे अक्षतान् समर्पयामि ॥

**गंधोदक स्नानं** (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीम् ।

ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियम् ॥

हर चंदन संभूतं हर प्रीतिश्च गौरवात् ।

सुरभि प्रिय परमेश गंध स्नानाय गृह्यताम् ॥

ॐ श्री नीलकण्ठाय नमः । गंधोदक स्नानं समर्पयामि ॥

सकल पूजार्थे अक्षतान् समर्पयामि ॥

**अभ्यंग स्नानं** (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान । इयथिर्वाचमरितेव नावम् ।

सुमङ्गलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवम् ।

सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते ॥

ॐ उमापतये नमः । अभ्यंग स्नानं समर्पयामि । सकल पूजार्थे अक्षतान् समर्पयामि ॥

**अंगोद्वर्तनकं** (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितम् ।

लेपनार्थं गृहाणेदं हरिद्रा कुङ्कुमैर्युतम् ॥

ॐ कपर्दिने नमः। अंगोद्वर्तनं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

**उष्णोदक स्नानं** (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतम्।

स्नानार्थं च प्रयश्चामि स्वीकुरुश्व दयानिधे ॥

ॐ चन्द्रशेखराय नमः। उष्णोदक स्नानं समर्पयामि ॥

सकल पूजार्थे अक्षतान् समर्पयामि ॥

**शुद्धोदक स्नानं** (Pure water bath) sprinkle water all around

मन्दाकिन्याः समानीतं हेमाम्बोरुहावासितं।

स्नानार्थे मय भक्त्या नीरुं स्वीकुर्यतां विभो ॥

ॐ आपोहिष्टा मयो भुवः। तान ऊर्जे दधातन। महीरणाय चक्षसे।

योवः शिवतमोरसः तस्यभाजयते हनः। उशतीरिव मातरः। तस्मात्

अरंगमामवो। यस्य क्षयाय जिंवध। आपो जन यथाचनः ॥

ॐ हराय नमः। शुद्धोदक स्नानं समर्पयामि ॥ सकल पूजार्थे अक्षतान् समर्पयामि ॥

(after sprinkling water around throw one tulasi leaf to the north)

**महा अभिषेकः** (Sound the bell, pour water from kalasha)

**पुरुष सूक्त जपं कुर्यात्** (Chant Purusha Sooktam)

from सहस्रशीर्षा पुरुषः to यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ श्री रुद्राय नमः। पुरुषसूक्त स्नानं समर्पयामि। ॥

बलाय श्रियै यशसेनद्याय अमृताभिषेको अस्तु। शान्तिः पुष्टिः तुष्टिश्चास्तु ॥

ॐ पिनाकिने नमः। महा अभिषेक स्नानं समर्पयामि ॥

ॐ नमः शिवाय। स्नानानंतर आचमनीयं समर्पयामि ॥

**तर्पणं** (Offer water)

ॐ भव देवं तर्पयामि। ॐ शर्वं देवं तर्पयामि। ॐ ईशानं देवं तर्पयामि।

ॐ पशुपतिं देवं तर्पयामि। ॐ उग्रं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि।

ॐ भीमं देवं तर्पयामि। ॐ महान्तं देवं तर्पयामि।

**प्रतिष्ठापना**

ॐ नमः शिवाय॥ (Repeat 12 times)

ॐ तदस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमेस्तुशस्तम्।

अशीमहि गादमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय॥

ॐ ग्रिहावै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा।

शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते गृहानेवै॥

नानाजिगमिशति ग्रिहाहि पशूनां प्रतिष्ठा प्रतिष्ठा

ॐ श्री साम्बसदाशिवाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय नमः।

श्री साम्बसदाशिवं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि॥

श्री गौरी सहित श्री साम्बसदाशिवाय नमः॥ सुप्रतिष्ठमस्तु॥

**वस्त्र** ( offer two pieces of cloth for the Lord)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये॥

वस्त्र सूक्ष्मं दुकूलं च देवानामपि दुर्लभं।

गृहाणतं उमाकान्त प्रसन्नो भव सर्वदा॥

ॐ शिवाय नमः। वस्त्रयुग्मं समर्पयामि ॥

**श्री महा गौरी पूजा**

**कंचुकी**

नवरत्नाभिर्दधां सौवर्णैश्चैव तंतुभिः ।

निर्मितां कंचुकीं भक्त्या गृहाण परमेश्वरी ॥

ॐ श्री महा गौर्यै नमः । कंचुकीं समर्पयामि ॥

**कण्ठ सूत्र**

मांगल्य तंतुमणिभिः मुक्तैश्चैव विराजितम् ।

सौमाङ्गल्य अभिवृध्यर्थं कण्ठसूत्रं ददामि ते ॥

ॐ श्री महा गौर्यै नमः । कण्ठसूत्रं समर्पयामि ॥

**ताडपत्राणि**

ताडपत्राणि दिव्याणि विचित्राणि शुभानि च ।

कराभरणयुक्तानि मातस्तत्प्रतिगृह्यताम् ॥

ॐ श्री महा गौर्यै नमः ताडपत्रानि समर्पयामि ॥

**हरिद्रा**

हरिद्रा रंजिते देवी सुख सौभाग्य दायिनी ।

हरिद्रांते प्रदास्यामि गृहाण परमेश्वरि ॥

ॐ श्री महा गौर्यै नमः । हरिद्रा समर्पयामि ॥

**कुङ्कुम**

कुङ्कुमं कामदां दिव्यं कामिनी काम संभवम् ।

कुङ्कुमाचिंते देवि सौभाग्यार्थं प्रतिगृह्यताम् ॥

ॐ श्री महा गौर्यै नमः । कुङ्कुमं समर्पयामि ॥

**कज्जल**

सुनील भ्रमराभसं कज्जलं नेत्र मण्डनम्।

मयादत्तमिदं भक्त्या कज्जलं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। कज्जलं समर्पयामि॥

**सिंदूर**

विद्युत् कृशानु सङ्काशं जपा कुसुमसन्निभम्।

सिन्दूरंते प्रदास्यामि सौभाग्यं देहि मे चिरम्॥

ॐ श्री महा गौर्यै नमः। सिन्दूरं समर्पयामि॥

**नाना आभरण**

स्वभावा सुन्दरांगि त्वं नाना रत्न युतानि च।

भूषणानि विचित्राणि प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। नाना आभरणानि समर्पयामि॥

नाना परिमल द्रव्यम्

नाना सुगन्धिकं द्रव्यं चूर्णीकृत्य प्रयत्नतः।

ददामि ते नमस्तुभ्यं प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ श्री महा गौर्यै नमः। नाना परिमल द्रव्यं समर्पयामि॥

**यज्ञोपवीतम्**

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।

पशूगुँस्तागुंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये॥

यज्ञोपवीतं सहजं ब्रह्मणं निर्मितं पुर। आयुष्यं भव वर्चस्वम् उपवीतं गृहाण मे॥

ॐ श्री सर्वेश्वराय नमः। यज्ञोपवीतं समर्पयामि॥

**आभरणं**

गृहाण नानाभरणानि शम्भो महेश जम्बूनाद् निर्मितानि ।

ललाट कण्ठोत्तम कर्ण हस्त नितम्ब हस्तांगुलि भूषणानि ॥

ॐ शिवाय नमः । आभरणानि समर्पयामि ॥

**गन्धम्**

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।

छन्दाँगुसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

गन्धं गृहाण देवेश कस्तूरि कुङ्कुमान्वितम् । विलेपनार्थं कर्पूररोचन लोहितं मया ॥

ॐ श्री हराय नमः । गन्धं समर्पयामि ॥

**नाना परिमल द्रव्यम्**

ॐ अहिरेव भोग्येः पर्येति बाहुं जाया हेतिं परिभादमानः । हस्तज्ञो विश्वावयुनानि

विद्वान्पुमास्प्रमांसं परिपातु विश्वतः ॥

ॐ श्री महेश्वराय नमः । नाना परिमल द्रव्यं समर्पयामि ॥

**अक्षत**

तस्मादश्वा अजायन्त ये के चो भयादतः ।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

अक्षतान् धवलान् शुभ्रान् कर्पूरागुरु मिश्रितान् ।

गृहाण परया भक्त्या मया तुभ्यं समर्पितान् ॥

श्री शर्वाय नमः । अक्षतान् समर्पयामि ॥

**पुष्प**

बिल्वापमार्ग धत्तूर करवीरार्क सम्भवैः ।

बकोत्फलद्रोण मुख्यैः पुष्पै पूजित शंकर ॥

ॐ श्री भवाय नमः । पुष्पाणि समर्पयामि ॥

**अथाङ्गपूजाः**

ॐ शिवाय नमः । पादौ पूजयामि ॥

ॐ व्योमात्मने नमः । गुल्फौ पूजयामि ॥

ॐ अनन्तैश्वर्य नाथाय नमः । जानुनी पूजयामि ॥

ॐ प्रधानाय नमः । जंघे पूजयामि ॥

ॐ अनन्त विराजसिंहाय नमः । ऊरून् पूजयामि ॥

ॐ ज्ञान भूताय नमः । गुह्यं पूजयामि ॥

ॐ सत्यसेव्याय नमः । जघनं पूजयामि ॥

ॐ अनन्तधर्माय नमः । कटिं पूजयामि ॥

ॐ रुद्राय नमः । उदरं पूजयामि ॥

ॐ सत्यधराय नमः । हृदयं पूजयामि ॥

ॐ ईशाय नमः । पार्श्वौ पूजयामि ॥

ॐ तत्पुरुषाय नमः । पृष्ठदेहं पूजयामि ॥

ॐ अघोरहृदयाय नमः । स्कन्धौ पूजयामि ॥

ॐ व्योमकेशात्मरूपाय नमः । बाहून् पूजयामि ॥

ॐ हराय नमः । हस्तान् पूजयामि ॥

ॐ चतुर्भाववे नमः । कण्ठं पूजयामि ॥

ॐ वामदेवाय नमः । वदनं पूजयामि ॥

ॐ पिनाकहस्ताय नमः । नासिकां पूजयामि ॥

ॐ श्रीकण्ठाय नमः। श्रोत्रे पूजयामि ॥

ॐ इन्दुमुखाय नमः। नेत्राणि पूजयामि ॥

ॐ हरये नमः। भ्रवौ पूजयामि ॥

ॐ सद्योजातवेदाय नमः। भ्रूमध्यं पूजयामि ॥

ॐ वामदेवाय नमः। ललाटं पूजयामि ॥

ॐ सर्वात्मने नमः। शिरः पूजयामि ॥

ॐ चन्द्रमौलये नमः। मौलिं पूजयामि ॥

ॐ सदाशिवाय नमः। सर्वाङ्गाणि पूजयामि ॥

**अथ पुष्प पूजा**

ॐ शर्वाय नमः। करवीर पुष्पं समर्पयामि ॥

ॐ भवनाशनाय नमः। जाजी पुष्पं समर्पयामि ॥

ॐ महादेवाय नमः। चम्पक पुष्पं समर्पयामि ॥

ॐ उग्राय नमः। वकुल पुष्पं समर्पयामि ॥

ॐ उग्रनाभाय नमः। शतपत्र पुष्पं समर्पयामि ॥

ॐ भवाय नमः। कल्हार पुष्पं समर्पयामि ॥

ॐ शशिमौलिने नमः। सेवन्तिका पुष्पं समर्पयामि ॥

ॐ रुद्राय नमः। मल्लिका पुष्पं समर्पयामि ॥

ॐ नीलकण्ठाय नमः। इरुवंतिका पुष्पं समर्पयामि ॥

ॐ शिवाय नमः। गिरिकर्णिका पुष्पं समर्पयामि ॥

ॐ भवहारिणे नमः। आथसी पुष्पं समर्पयामि ॥

बिल्वापमार्ग धत्तूर करवीरार्क सम्भवैः।

बकोत्फलद्रोण मुख्यैः पुष्पै पूजित शंकर ॥

भवाय नमः। नानाविधपुष्पाणि समर्पयामि ॥

## अथ पत्र पूजा

ॐ महादेवाय नमः। बिल्व पत्रं समर्पयामि ॥

ॐ महेश्वराय नमः। जाजी पत्रं समर्पयामि ॥

ॐ शंकराय नमः। चम्पका पत्रं समर्पयामि ॥

ॐ वृषभध्वजाय नमः। तुलसी पत्रं समर्पयामि ॥

ॐ शूलपाणिने नमः। दूर्वा युग्मं समर्पयामि ॥

ॐ कामाङ्ग नाशनाय नमः। सेवंतिका पत्रं समर्पयामि ॥

ॐ देवदेवेशाय नमः। मरुग पत्रं समर्पयामि ॥

ॐ श्रीकण्ठाय नमः। दवन पत्रं समर्पयामि ॥

ॐ ईश्वराय नमः। करवीर पत्रं समर्पयामि ॥

ॐ पार्वतीपतये नमः। विष्णुक्रान्ति पत्रं समर्पयामि ॥

ॐ रुद्राय नमः। माचि पत्रं समर्पयामि ॥

ॐ सदाशिवाय नमः। सर्वपत्राणि समर्पयामि।

## प्रथमावरण पूजा

देवस्य पश्चिमे सद्योजाताय नमः। उत्तरे वामदेवाय नमः।

दक्षिणे अघोराय नमः। पूर्वे तत्पुरुषाय नमः। ऊर्ध्वं ईशानाय नमः।

## द्वितीयावरण पूजा

आग्नेय कोणे हृदयाय नमः। ईशानकोणे शिरसे स्वाहा।

नैऋत्य कोणे शिखायै वौषट्। वायव्य कोणे कवचाय हुं।

अग्रे नेत्रत्रयाय वौषट्। दिक्षु अस्त्राय फट्।

(right hand round the head and quickly sound a clap - thus you close all directions)

## तृतीयावरण पूजा

प्राच्यां अनन्ताय नमः। आवाच्यां सूक्ष्माय नमः।

प्रतीच्यां शिवोत्तमाय नमः। उदिच्यां एकनेत्राय नमः। ईशान्यां एकरुद्राय नमः।

आग्नेयां त्रै मूर्तये नमः। नैऋत्यां श्रीकण्ठाय नमः। वायव्यां शिखन्दिने नमः।

## चतुर्थावरण पूजा

उत्तरे दिग्दले उमायै नमः। ईशान दिग्दले चण्डेश्वराय नमः।

पूर्व दिग्दले नन्दीश्वराय नमः। आग्नेय दिग्दले महाकालाय नमः।

दक्षिण दिग्दले वृषभाय नमः। नैऋत्य दिग्दले गणेश्वराय नमः।

पश्चिम दिग्दले भृंघीशाय नमः। वायव्य दिग्दले महासेनाय नमः।

## पंचमावरण पूजा

इंद्राय नमः। अग्नये नमः। यमाय नमः। नैऋतये नमः। वरुणाय नमः।

वायव्ये नमः। कुबेराय नमः। ईशानाय नमः। ब्राह्मणे नमः। अनंताय नमः।

## षष्ठावरण पूजा

वज्राय नमः। शक्तये नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः।

अंकुशाय नमः। गधायै नमः। त्रिशूलाय नमः। पद्माय नमः। चक्राय नमः।

सर्वेभ्यो आवरण देवताभ्यो नमः। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि॥

## अष्टोत्तरशतनाम पूजा॥ ॐ॥

शिवाय नमः। महेश्वराय नमः। शंभवे नमः। पिनाकिने नमः। शशिशेखराय नमः।

वामदेवाय नमः। विरूपाक्षाय नमः। कपर्दिने नमः। नीललोहिताय नमः। शंकराय नमः।

शूलपाणये नमः। खट्वांगिने नमः। विष्णुवल्लभाय नमः। शिपिविष्टाय नमः।

अंबिकानाथाय नमः। श्रीकण्ठाय नमः। भक्तवत्सलाय नमः। भवाय नमः। शर्वाय नमः।

त्रिलोकेशाय नमः। शितिकण्ठाय नमः। शिवा प्रियाय नमः। उग्राय नमः।

कपालिने नमः। कामारये नमः। अन्धकासुर सूदनाय नमः। गंगाधराय नमः।

ललाटाक्षाय नमः। कालकालाय नमः। कृपानिधये नमः। भीमाय नमः।

परशुहस्ताय नमः। मृगपाणये नमः। जटाधराय नमः। कैलासवासिने नमः।

कवचिने नमः। कठोराय नमः। त्रिपुरान्तकाय नमः। वृषांकाय नमः। वृषभारूढाय नमः।

भस्मोद्धूलित विग्रहाय नमः। सामप्रियाय नमः। स्वरमयाय नमः। त्रयीमूर्तये नमः।

अनीश्वराय नमः। सर्वज्ञाय नमः। परमात्मने नमः। सोमसूर्याग्निलोचनाय नमः।

हविषे नमः। यज्ञमयाय नमः। सोमाय नमः। पंचवक्त्राय नमः। सदाशिवाय नमः।

विश्वेश्वराय नमः। वीरभद्राय नमः। गणनाथाय नमः। प्रजापतये नमः।हिरण्यरेतसे नमः।

दुर्धर्षाय नमः। गिरीशाय नमः। गिरिशाय नमः। अनघाय नमः। भुजंगभूषणाय नमः।

भर्गाय नमः। गिरिधन्वने नमः। गिरिप्रियाय नमः। कृत्तिवाससे नमः। पुरारातये नमः।

भगवते नमः। प्रमथाधिपाय नमः। मृत्युंजयाय नमः। सूक्ष्मतनवे नमः। जगद्व्यापिने नमः।

जगद्गुरुवे नमः। व्योमकेशाय नमः। महासेनजनकाय नमः। चारुविक्रमाय नमः।

रुद्राय नमः। भूतपतये नमः। स्थाणवे नमः। अहयेबुध्न्याय नमः। दिगंबराय नमः।

अष्टमूर्तये नमः। अनेकात्मने नमः। सात्विकाय नमः। शुद्धविग्रहाय नमः।

शाश्वताय नमः। खण्डपरशवे नमः। अज्ञाय नमः।पाशविमोचकाय नमः। मृडाय नमः।

पशुपतये नमः। देवाय नमः। महादेवाय नमः। अव्ययाय नमः। हरये नमः।

भगनेत्रभिदे नमः। अव्यक्ताय नमः। दक्षाध्वरहराय नमः। हराय नमः। पूषदन्तभिदे नमः।

अव्यग्राय नमः। सहस्राक्षाय नमः। सहस्रपदे नमः। अपवर्गप्रदाय नमः। अनन्ताय नमः।

तारकाय नमः। परमेश्वराय नमः। इति अष्टोत्तर पूजां समर्पयामि॥

## धूपं

वनस्पत्युद्भवो दिव्यो गन्धाढ्यो गन्धवुत्तमः ।

आघ्रेयः महिपालो धूपोयं प्रतिगृह्यताम् ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।

मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

ॐ बलाय नमः । ॐ शिवाय नमः । धूपं आघ्रापयामि ॥

## दीपं

दीपं हि परमं शम्भो घृत प्रज्वलितं मया ।

दत्तं गृहाण देवेश मम ज्ञानप्रद भव ॥

भक्त्या दीपं प्रयश्चामि देवाय परमात्मने ।

त्राहि मां नरकात् घोरात् दीपं ज्योतिर् नमोस्तुते ॥

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।

उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

ॐ श्री बलप्रमथनाय नमः । ॐ नमः शिवाय । दीपं दर्शयामि ॥

## नैवेद्यं

(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. ; remove lid and sprinkle water around the vessel; place in each food item one washed leaf/flower/axatha)

ॐ सदाशिवाय विद्महे महादेवाय धीमहि । तन्नो शंकर प्रचोदयात् ॥

ॐ नमः शिवाय ॥ (show mudras)

निर्वीषिकरणार्थे तार्क्ष मुद्रा । अमृती करणार्थे धेनु मुद्रा ।

पवित्रीकरणार्थे शङ्ख मुद्रा । संरक्षणार्थं चक्र मुद्रा । विपुलमाया करणार्थे मेरु मुद्रा ।

Touch naivedya and chant 9 times ॐ

ॐ सत्यंतवर्तेन परिसिञ्चामि (sprinkle water around the naivedya)

भोः स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य (request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणकचिते गोघृतां

सुपक्वां भक्ष्यां भोज्यां च लेह्यानपि

सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं

समधु दधि घृतं क्षीर पाणीय युक्तं

तांबूलं चापि शिवं प्रतिदिवसमहं मनसे चिन्तयामि ॥

अद्य तिष्ठति यत्किन्चित् कल्पितश्चापरंगृहे

पक्वान्नं च पानीयं यथोपस्कर संयुतं

यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः

तत्सर्वं शिवपूजास्तु प्रयतां मे महेश्वर

सुधारसं सुविफुलं आपोषणमिदं

तव गृहाण कलशानीतं यथेष्टमुप भुज्ज्यताम् ॥

ॐ नमः शिवाय । अमृतोपस्तरणमसि स्वाहा ॥

(drop water from shankha)

ॐ प्राणात्मने स्वाहा । ॐ अपानात्मने स्वाहा । ॐ व्यानात्मने स्वाहा ।

ॐ उदानात्मने स्वाहा । ॐ समानात्मने स्वाहा । ॐ नमः शिवाय ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।

ईप्सितं मे वरं देहि इहत्र च परां गतिम् ॥

श्री सदाशिवं नमस्तुभ्यं महा नैवेद्यं उत्तमम् ।

संगृहाण सुरश्रेष्ठ भक्ति मुक्ति प्रदायकम्॥ नैवेद्यं समर्पयामि॥

(cover face with cloth and chant गायत्री मंत्र five times or repeat 12 times ॐ नमः शिवाय )

सर्वत्र अमृतोपिधान्यमसि स्वाहा।

ॐ नमः शिवाय। उत्तरापोषणं समर्पयामि॥

(Let flow water from shankha)

**महा फलं** (put tulsi / axathaa on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्तव।

तेन मे सफलावाप्तिर् भवेत् जन्मनि जन्मनि॥

ॐ शिवाय नमः। महाफलं समर्पयामि।

**फलाष्टक** (put tulsi/axata on fruits)

कूष्माण्ड मातुलिङ्गं च नारिकेलफलानि च।

गृहाण पार्वतीकान्त सोमेश प्रतिगृह्यताम्॥

ॐ केदारेश्वराय नमः। फलाष्टकं समर्पयामि॥

**करोद्वर्तनम्**

करोद्वर्तन्कं देवमया दत्तं हि भक्तितः।

चारु चंद्र प्रभां दिव्यां गृहाण जगदीश्वर॥

ॐ श्री शंकराय नमः। करोद्वर्तनार्थे चंदनं समर्पयामि॥

**तांबूलं**

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम्।

ताम्बूलं गृह्यतां देव येल लवङ्ग संयुक्तम्॥

ॐ मनोन्मयाय नमः। पूगिफल ताम्बूलं समर्पयामि॥

## दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः। अनंत पुण्य फलदा अथः शांतिं प्रयश्च मे ॥

ॐ श्री शिवाय नमः। सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

## महा नीराजन

चक्षुर्दां सर्वलोकानां तिमिरस्य निवारणम्।

अर्थिक्यं कल्पितं भक्त्या गृहाण परमेश्वर ॥

श्रीये जातः श्रिय अनिरियाय श्रियं वयो जरित्रभ्यो ददाति

श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा मितद्रौ

श्रिय येवैनं तत् श्रिया मादधाति संतत मृचा वषट्कृत्यं

संततं संधीयते प्रजया पशुभिः ययेवं वेद ॥

ॐ नमः शिवाय। महानीराजनं दीपं समर्पयामि ॥

## कर्पूर दीप

अर्चत प्रार्चत प्रिय मे दासो अर्चत।

अर्चन्तु पुत्र का वतपुरन्न धृष्ण वर्चत ॥

कर्पूरकं महाराज रंभोद्भूतं च दीपकम्।

मङ्गलार्थं महीपाल सङ्गृहाण जगत्पते ॥

ॐ नमः शिवाय। कर्पूर दीपं समर्पयामि ॥

## प्रदक्षिणा

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

यानि कानि च पापानि जन्मांतर कृतानि च।

तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

प्रदक्षिण त्रियं देव प्रयत्नेन मया कृतं ।

तेन पापाणि सर्वाणि विनाशाय नमोऽस्तुते ॥

ॐ नमः शिवाय । प्रदक्षिणान् समर्पयामि ॥

**नमस्कार**

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।

देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ॥

नमस्ते सर्वलोकेश नमस्ते जगदीश्वर ।

नमस्तेस्तु पर ब्रह्म नमस्ते परमेश्वर ॥

हेतवे जगतावेव संसारार्णव सेतवे ।

प्रभवे सर्वविद्यानां शम्भवे गुरुवे नमः ॥

नमो नमो शम्भो नमो नमो जगत्पते ।

नमो नमो जगत्साक्षिण् नमो नमो निरन्जन ॥

नमोस्तुते शूलपाणे नमोस्तु वृषभध्वज ।

जीमूतवाहन करे सर्व त्र्यंबक शंकर ॥

महेश्वर हरेशान सुवनाक्ष वृषाकपे ।

दक्ष यज्ञ क्षयकर काल रुद्र नमोऽस्तुते ॥

त्वमादिरस्यजगत् त्वं मध्यं परमेश्वर ।

भवानंतश्च भगवन् सर्वगस्त्वयं नमोस्तुते ॥

पूर्वे शर्वाय कीर्तिमूर्तये नमः । ईशान्यां भवाय जलमूर्तये नमः ।

उत्तरे रुद्राय अग्निमूर्तये नमः । वायुव्यां उग्राय वायुमूर्तये नमः ।

पश्चिमे भीमाय आकाशमूर्तये नमः। नैऋत्यां पशुपतये यजमान मर्दये नमः।

दक्षिणे महादेवाय सोममूर्तये नमः। आग्नेयां ईशानाय सूर्यमूर्तये नमः॥

ॐ नमः शिवाय। नमस्कारान् समर्पयामि॥

## राजोपचार

गृहाण परमेशान सरत्ने छत्र चामरे।

दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः॥

ॐ चन्द्रशेखराय नमः। छत्रं समर्पयामि। ॐ व्योमकेशाय नमः।

चामरं समर्पयामि। ॐ विश्वात्मने नमः। गीतं समर्पयामि। ॐ सोममूर्तये नमः।

नृत्यं समर्पयामि। ॐ विश्वमूर्तये नमः। वाद्यं समर्पयामि।

ॐ गंभीरनादाय नमः। दर्पणं समर्पयामि। ॐ मृगपाणये नमः।

व्यञ्जनं समर्पयामि। ॐ भुजंगनाथाय नमः। आन्दोलनं समर्पयामि।

ॐ त्रिकालाग्निनेत्राय नमः। राजोपचारान् समर्पयामि।

ॐ सर्वव्यापिने नमः। सर्वोपचारान् समर्पयामि।

## मंत्र पुष्प

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।

सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्॥

विद्या बुद्धि धनैश्वर्य पुत्र पौत्रादि संपदः।

पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम्॥

नमोऽस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे।

सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्र कोटी युगधारिणे नमः ॥

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नमो आसीनेभ्यः।

यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव ॥

ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां व्रशन्वान्।

शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः ॥

ॐ कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः।

उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः ॥

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कूर्महे

समे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो दधातु

कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं

पारमेष्ठां राज्यं महाराज्यमाधिपत्यमयं समंत

पर्यायिस्यात् सार्व भूॐअः सार्वायुशः अंतादा

परार्धात् पृथिव्यै समुद्र पर्यन्ताय एकरालिति तदप्येश

श्लोकोभिगीतो मरूतः परिवेष्टारो मरुतस्या वसन्गृहे

आवीक्षितस्य कामप्रेर्विश्वेदेवा सभासद इति ॥

श्री साम्बसदाशिवाय नमः। मंत्रपुष्पं समर्पयामि ॥

**क्षमापनं**

यत्किंचित् कुर्महे देव सद सुकृत्दुष्कृतम्। तन्मे शिवपादस्य भुंक्षवक्षपय शंकर ॥

करच्चरणकृतं वा कायजं कर्मजं वा। श्रवण नयनजं वा मानसं वापराधम्॥

विहितमवहितं वा सर्वमेतत् क्षमस्व। जयजय करुणाब्धे श्री महादेव शम्भो ॥

## प्रार्थना

नमोव्यक्ताय सूक्ष्माय नमस्ते त्रिपुरान्तक ।

पूजां गृहाण देवेश यथाशक्त्युपपादिताम् ॥

किं न जानासि देवेश त्वयी भक्तिं प्रयश्च मे ।

स्वपादाग्रतले देव दास्यं देहि जगत्पते ॥

बद्धोहं विविद्धै पाशै संसारुभयबंधनै ।

पतितं मोहजाले मं त्वं समुध्धर शंकर ॥

प्रसन्नो भव मे श्रीमन् सद्गतिः प्रतिपाद्यताम् ।

त्वदालोकन मात्रेण पवित्रोस्मि न संशयः ॥

त्वदन्य शरण्यः प्रपन्नस्य नेति ।

प्रसीद स्मरन्नेव हन्यास्तु दैन्यम् ॥

नचेत्ते भवेद्भक्ति वात्सल्य हानि ।

स्ततो मे दयालो दयां सन्निदेहि ॥

सकारणमशेषस्य जगतः सर्वदा शिवः ।

गो ब्राह्मण नृपाणां च शिवं भवतु मे सदा ॥

## शङ्ख ब्रामण

(make three rounds of sha.nkha with water like aarati and pour down; chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे ।

इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

## तीर्थ प्राश्न

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।

येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः ॥

अकाल मृत्यु हरणं सर्व व्याधि निवारणं ।

सर्व पाप उपशमनं शिव पादोदकं शुभम् ॥

## विसर्जन पूजा

आराधितानां देवतानां पुनः पूजां करिष्ये ॥

ॐ नमः शिवाय ॥ पूजांते छत्रं समर्पयामि । चामरं समर्पयामि । नृत्यं समर्पयामि ।

गीतं समर्पयामि । वाद्यं समर्पयामि । आंदोलिक आरोहणं समर्पयामि ।

अश्वारोहणम् समर्पयामि । गजारोहणं समर्पयामि ।

श्री साम्बसदाशिवाय नमः ।

समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार पूजां समर्पयामि ॥

## आत्म समर्पण

नित्यं नैमित्तिकं काम्यं यत्कृतं तु मया शिव ।

तत् सर्वं परमेशान मया तुभ्यं समर्पितम् ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।

यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।

पूजाविधिं न जानामि क्षमस्व पुरुषोत्तम ॥

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।

तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

वर्तमाने बहुदान्य नाम संवत्सरे माग मासे कृश्ण पक्षे

त्रयोदसि तिथौ श्री साम्बसदाशिव प्रेरणया श्री साम्बसदाशिव प्रीत्यर्थं

अनेन मया चरित शिवरात्रि व्रते श्री सदाशिव पूजाराधनेन

भगवान् श्री शंकरः प्रीयतां ॥ ॐ तत्सत् ॥ श्री सदाशिवार्पणमस्तु ॥

**अर्घ्यप्रदानं**

श्री साम्बसदाशिव प्रेरणया श्री साम्बसदाशिव प्रीत्यर्थं शिवरात्रि व्रत

सम्पूर्ण फल प्राप्यर्थं च अर्घ्यं प्रदानं करिष्ये ।

व्योमकेश नमस्तुभ्यं व्योमात्मा व्योमरूपिणे ।

नक्षत्ररुपिणे तुभ्यं ददाम्यर्घ्यं नमोऽस्तुते ।

श्री शिवाय नमः । तारकलिंगाय इदमर्घ्यं दत्तं न मम ॥

कैलाश निलय शम्भो पार्वती प्रिय वल्लभ ।

त्रैलोक्यतमविध्वंसिन् गृहाणर्घ्यं सदाशिव ॥

श्री शिवाय नमः । सदाशिवाय इदमर्घ्यं दत्तं न मम ॥

कालरुद्र शिव शम्भो कालात्मन् त्रिपुरांतक ।

दुरितघ्न सुरश्रेष्ठ गृहाणर्घ्यं सदाशिव ॥

श्री शिवाय नमः । सदाशिवाय इदमर्घ्यं दत्तं न मम ॥

आकाशाद्याशरीराणि गृहनक्षत्रमालैनि ।

सर्व सिद्धि निवासार्तं ददामर्घ्यं सदाशिव ॥

श्री शिवाय नमः । सदाशिवाय इदमर्घ्यं दत्तं न मम ॥

उमादेवी शिवार्धाङ्गी जगन्मातृ गुणात्मिके ।

त्राहि मां देवि सर्वेषि गृहाणार्घ्यं नमोऽस्तुते ॥

श्री पार्वत्यै नमः। पार्वत्यै इदमर्घ्यं दत्तं न मम॥

श्री गुणात्मन् त्रिलोकेशः ब्रह्मा विष्णु शिवात्मक।

अर्घ्यं चेदं मया दत्तं गृहाण गणनायक।॥

श्री गणपतये नमः। गणपतये इदमर्घ्यं दत्तं न मम॥

सेनाधिप सुरश्रेष्ठ पार्वती प्रियनन्दन। गृहाणर्घ्यं मया दत्तं नमस्ते शिखिवाहन।

श्री स्कन्दाय नमः। स्कन्दाय इदमर्घ्यं दत्तं न मम॥

वीरभद्र महावीर विश्व ज्ञान वर प्रद। इदमर्घ्यं प्रदास्यामि संग्रहाण शिवप्रिय॥

श्री वीरभद्राय नमः। वीरभद्राय इदमर्घ्यं दत्तं न मम॥

धर्मस्त्वं वृष रूपेण जगदानन्दकारक। अष्टमूर्तेरधिष्ठानं अथः पाहि सनातन।

श्री वृषभाय नमः। वृषभाय इदमर्घ्यं दत्तं न मम॥

चण्डीश्वर महादेव त्राहि माम् कृपयाकार। इदमर्घ्यं प्रदास्यामि प्रसन्ना वरदा भव।

श्री चण्डीश्वराय नमः। चण्डीश्वराय इदमर्घ्यं दत्तं न मम॥

अनेन शिवरात्रि व्रतांगत्वेन अर्घ्यप्रदानेन भगवन् श्री सदाशिव प्रीयतां।

ॐ तत्सत् श्री सदाशिवार्पणमस्तु॥

यान्तु देव गणाः सर्वे पूजां आदाय पर्तिवीम्

इष्ट काम्यार्थ सिध्यर्थं पुनरागमनाय च॥ (Shake the kalasha)

## ॥ तैत्तिरीयोपनिषत् ॥

## ॥ शीक्षावल्ली ॥

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः।

शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।

त्वमे वप्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि।

तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः॥ १॥

**इति प्रथमोऽनुवाकः॥**

ॐ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्।

साम सन्तानः। इत्युक्तः शीक्षाध्यायः॥ १॥

**इति द्वितीयोऽनुवाकः॥**

सह नौ यशः। सह नौ ब्रह्मवर्चसम्।

अथातः स॰ँहिताया उपनिषदम् व्याख्यास्यामः। पञ्च स्वधि करणेषु।

अधि लोकमधि ज्यौतिष मधि विद्यमधि प्रज मध्यात्मम्।

ता महास॰ँहिता इत्याचक्षते। अथाधि लोकम्।

पृथिवी पूर्व रूपम्। द्यौ रुत्तर रूपम्। आकाशः सन्धिः॥ १॥

वायुः सन्धानम्। इत्यधि लोकम्। अथाधि ज्यौतिषम्। अग्निः पूर्व रूपम्।

आदित्य उत्तर रूपम्। आपः सन्धिः। वैद्युतः सन्धानम्। इत्यधि ज्यौतिषम्।

अथाधि विद्यम्। आचार्यः पूर्व रूपम्॥ २॥

अन्तेवा स्युत्तर रूपम्। विद्या सन्धिः। प्रवचन॰ँ सन्धानम्।

इत्यधि विद्यम्। अथाधि प्रजम्। माता पूर्व रूपम्। पितोत्तर रूपम्।
प्रजा सन्धिः। प्रजननꣳ सन्धानम्। इत्यधि प्रजम्॥ ३॥
अथा ध्यात्मम्। अधरा हनुः पूर्व रूपम्। उत्तरा हनु रुत्तर रूपम्।
वाक्सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्। इतीमा महासꣳहिताः।
य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः।
ब्रह्मवर्चसेना न्नाद्येन सुवर्ग्येण लोकेन॥ ४॥

**इति तृतीयोऽनुवाकः॥**

यश्छन्दसा मृषभो विश्वरूपः। छन्दोभ्योऽध्य मृताथ्सं बभूव।
स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्।
शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्।
ब्रह्मणः कोशोऽसि मेधयाऽपिहितः। श्रुतं मे गोपाय। आवहन्ती वितन्वाना॥ १॥

कुर्वाणाऽचीर मात्मनः। वासाꣳसि मम गावश्च।
अन्नपाने च सर्वदा। ततो मे श्रियमावह।
लोमशां पशुभिः सह स्वाहा। आ मायन्तु ब्रह्मचारिणः स्वाहा।
वि माऽऽयन्तु ब्रह्मचारिणः स्वाहा। प्र माऽऽयन्तु ब्रह्मचारिणः स्वाहा।
दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा॥ २॥

यशो जनेऽसानि स्वाहा। श्रेयान् वस्यसोऽसानि स्वाहा।
तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा।
तस्मिन् थ्सहस्र शाखे। निभगाहं त्वयि मृजे स्वाहा।
यथाऽऽपः प्रवताऽऽयन्ति। यथा मासा अहर्जरम्।

एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतः स्वाहा।

प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥ ३॥

**इति चतुर्थोऽनुवाकः॥**

भूर्भुवः सुवरिति वा एता स्तिस्रो व्याहृतयः।

तासामु ह स्मैतां चतुर्थीम्। माहाचमस्यः प्रवेदयते।

मह इति। तत् ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः।

भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः॥ १॥

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते।

भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः।

मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतीꣳषि महीयन्ते।

भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूꣳषि॥ २॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते।

भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः।

मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते।

ता वा एता श्चतस्र श्चतुर्धा। चतस्र श्चतस्रो व्याहृतयः।

ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति॥ ३॥

**इति पञ्चमोऽनुवाकः॥**

स य एषोऽन्तर हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः।

अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलंबते।

सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले।

भूरित्यग्नौ प्रति तिष्ठति । भुव इति वायौ ॥ १ ॥

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् ।

आप्नोति मनस स्पतिम् । वाक्पतिश्च क्षुष्पतिः । श्रोत्रपति र्विज्ञानपतिः ।

एत त्ततो भवति । आकाश शरीरं ब्रह्म । सत्यात्म प्राणा रामं मन आनन्दम् ।

शान्ति समृद्ध ममृतम् । इति प्राचीन योग्यो पास्स्व ॥ २ ॥

**इति षष्ठोऽनुवाकः ॥**

पृथिव्यन्तरिक्षं द्यौ र्दिशोऽवान्तर दिशाः । अग्नि र्वायुरादित्य श्चन्द्रमा नक्षत्राणि ।

आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधि भूतम् । अथा ध्यात्मम् ।

प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् ।

चर्म माꣳसꣳ स्नावास्थि मज्जा । एतदधि विधाय ऋषिर वोचत् ।

पाङ्क्तं वा इदꣳ सर्वम् । पाङ्क्ते नैव पाङ्क्तꣳ स्पृणोतीति ॥ १ ॥

**इति सप्तमोऽनुवाकः ॥**

ओमिति ब्रह्म । ओमितीदꣳ सर्वम् ।

ओमित्येत दनुकृतिर्ह स्म वा अप्यो श्राव येत्या श्राव यन्ति ।

ओमिति सामानि गायन्ति । ओꣳशोमिति शस्त्राणि शꣳसन्ति ।

ओमित्य ध्वर्युः प्रतिगरं प्रति गृणाति । ओमिति ब्रह्मा प्रसौति ।

ओमित्यग्नि होत्र मनु जानाति ।

ओमिति ब्राह्मणः प्रवक्ष्य न्नाह ब्रह्मो पाप्नवा नीति । ब्रह्मैवो पाप्नोति ॥ १ ॥

**इत्यष्टमोऽनुवाकः ॥**

ऋतं च स्वाध्याय प्रवचने च । सत्यं च स्वाध्याय प्रवचने च ।

तपश्च स्वाध्याय प्रवचने च। दमश्च स्वाध्याय प्रवचने च।

शमश्च स्वाध्याय प्रवचने च। अग्नयश्च स्वाध्याय प्रवचने च।

अग्निहोत्रं च स्वाध्याय प्रवचने च। अतिथयश्च स्वाध्याय प्रवचने च।

मानुषं च स्वाध्याय प्रवचने च। प्रजा च स्वाध्याय प्रवचने च।

प्रजनश्च स्वाध्याय प्रवचने च। प्रजातिश्च स्वाध्याय प्रवचने च।

सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः।

स्वाध्याय प्रवचने एवेति नाको मौद्गल्यः। तद्धि तप स्तद्धि तपः॥ १॥

**इति नवमोऽनुवाकः॥**

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव।

ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविण२ं सवर्चसम्।

सुमेधा अमृतोक्षितः। इति त्रिशङ्को र्वेदानु वचनम्॥ १॥

**इति दशमोऽनुवाकः॥**

वेदमनूच्या चार्योन्ते वासिन मनुशास्ति।

सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

आचार्याय प्रियं धन माहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

सत्यान्न प्रमदि तव्यम्। धर्मान्न प्रमदि तव्यम्।

कुशलान्न प्रमदि तव्यम्। भूत्यै न प्रमदि तव्यम्।

स्वाध्याय प्रवचनाभ्यां न प्रमदि तव्यम्॥ १॥

देव पितृ कार्याभ्यां न प्रमदि तव्यम्। मातृ देवो भव।

पितृ देवो भव। आचार्य देवो भव। अतिथि देवो भव।

यान्य नवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।

यान्यस्माकꣳ सुचरितानि। तानि त्वयोपास्यानि॥ २॥

नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः।

तेषां त्वयाऽऽसनेन प्रश्वसि तव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्।

श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।

अथ यदि ते कर्म विचिकित्सा वा वृत्त विचिकित्सा वा स्यात्॥ ३॥

ये तत्र ब्राह्मणा स्संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः।

यथा ते तत्र वर्तेरन्न्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु।

ये तत्र ब्राह्मणा स्संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः।

यथा ते तेषु वर्तेरन्न्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः।

एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्॥ ४॥

**इत्येकादशऽनुवाकः॥**

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः।

शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।

त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्।

तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः॥ १॥

**इति द्वादशोऽनुवाकः॥**

**॥ इति शीक्षावल्ली समाप्ता॥**

## ॥ आनन्द वल्ली ॥

॥ हरिः ॐ ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ब्रह्म विदाप्नोति परम् । तदेषाऽभुक्ता । सत्यं ज्ञान मनन्तं ब्रह्म ।
यो वेद निहितं गुहायां परमे व्योमन् ।
सोऽश्नुते सर्वान् कामान्त्सह । ब्रह्मणा विपश्चितेति ॥
तस्माद्वा एतस्मा दात्मन आकाशः संभूतः । आकाशा द्वायुः ।
वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः ।
ओषधीभ्यो न्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नर समयः ।
तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः ।
अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ १ ॥

**इति प्रथमोऽनुवाकः ॥**

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः ।
अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः ।
अन्नꣳहि भूतानां ज्येष्ठम् । तस्मात् सर्वौषध मुच्यते ।
सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते ।
अन्नꣳहि भूतानां ज्येष्ठम् । तस्मात् सर्वौषध मुच्यते ।
अन्नाद् भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते ।
अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति ।
तस्माद्वा एतस्मादन्न रसमयात् । अन्योऽन्तर आत्मा प्राणमयः ।

तेनैष पूर्णः। स वा एष पुरुष विध एव।
तस्य पुरुष विधताम्। अन्वयं पुरुष विधः।
तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः।
अपान उत्तरः पक्षः। आकाश आत्मा।
पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

**इति द्वितीयोऽनुवाकः॥**

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये।
प्राणो हि भूताना मायुः। तस्मात् सर्वायुष मुच्यते।
सर्व मेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते।
प्राणो हि भूताना मायुः। तस्मात् सर्वायुष मुच्यत इति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य।
तस्माद्वा एतस्मात् प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः।
तेनैष पूर्णः। स वा एष पुरुष विध एव।
तस्य पुरुष विधताम्। अन्वयं पुरुष विधः। तस्य यजुरेव शिरः।
ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा।
अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

**इति तृतीयोऽनुवाकः॥**

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य।

तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः।
तेनैष पूर्णः। स वा एष पुरुष विध एव।
तस्य पुरुष विधताम्। अन्वयं पुरुषविधः।
तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः।
योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

**इति चतुर्थोऽनुवाकः॥**

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च।
विज्ञानं देवाः सर्वे। ब्रह्म ज्येष्ठ मुपासते। विज्ञानं ब्रह्म चेद्वेद।
तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा।
सर्वान्कामान् त्समश्नुत इति। तस्यैष एव शारीर आत्मा।
यः पूर्वस्य। तस्माद्वा एतस्मा द्विज्ञानमयात्।
अन्योऽन्तर आत्माऽऽनन्दमयः। तेनैष पूर्णः।
स वा एष पुरुष विध एव। तस्य पुरुष विधताम्। अन्वयं पुरुष विधः।
तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः।
आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

**इति पञ्चमोऽनुवाकः॥**

असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः।
उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती ३ ।

आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता ३ उ । सोऽकामयत ।

बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा ।

इदꣳसर्वम सृजत । यदिदं किञ्च । तत्सृष्ट्वा ।

तदेवानुप्राविशत् । तदनु प्रविश्य । सच्च त्यच्चाभवत् ।

निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च ।

विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् ।

यदिदं किञ्च । तत्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ॥ १ ॥

**इति षष्ठोऽनुवाकः ॥**

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत ।

तस्मात्त त्सुकृत मुच्यत इति । यद्वै तत् सुकृतम् । रसो वै सः ।

रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः प्राण्यात् ।

यदेष आकाश आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति ।

यदा ह्येवैष एतस्मिन्न दृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विन्दते ।

अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदर मन्तरं कुरुते ।

अथ तस्य भयं भवति । तत्वेव भयं विदुषोऽमन्वानस्य ।

तदप्येष श्लोको भवति ॥ १ ॥

**इति सप्तमोऽनुवाकः ॥**

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः ।

भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्यु र्धावति पञ्चम इति ।

सैषाऽऽनन्दस्य मीमाꣳसा भवति ।

युवा स्यात्साधु युवाऽध्यायकः ।

आशिष्ठो दृढिष्ठो बलिष्ठः ।

तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् ।

स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः ॥ १ ॥

स एको मनुष्य गन्धर्वाणा मानन्दः । श्रोत्रियस्य चाका महतस्य ।

ते ये शतं मनुष्य गन्धर्वाणा मानन्दाः ।

स एको देव गन्धर्वाणा मानन्दः । श्रोत्रियस्य चाका महतस्य ।

ते ये शतं देव गन्धर्वाणा मानन्दाः ।

स एकः पितृणां चिर लोक लोकाना मानन्दः ।

श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिर लोक लोकाना मानन्दाः ।

स एक आजान जानां देवाना मानन्दः ॥ २ ॥

श्रोत्रियस्य चाका महतस्य । ते ये शतं आजान जानां देवाना मानन्दाः ।

स एकः कर्म देवानां देवाना मानन्दः । ये कर्मणा देवान पियन्ति ।

श्रोत्रियस्य चाका महतस्य । ते ये शतं कर्म देवानां देवाना मानन्दाः ।

स एको देवाना मानन्दः । श्रोत्रियस्य चाका महतस्य ।

ते ये शतं देवाना मानन्दाः । स एक इन्द्रस्याऽऽनन्दः ॥ ३ ॥

श्रोत्रियस्य चाका महतस्य । ते ये शत मिन्द्रस्याऽऽनन्दाः ।

स एको बृहस्पते रानन्दः । श्रोत्रियस्य चाका महतस्य ।

ते ये शतं बृहस्पते रानन्दाः । स एकः प्रजापते रानन्दः ।

श्रोत्रियस्य चाका महतस्य । ते ये शतं प्रजापते रानन्दाः ।

स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाका महतस्य ॥ ४ ॥

स यश्चायं पुरुषे। यश्चासा वादित्ये। स एकः।
स य एवंवित्। अस्मा ल्लोका त्प्रेत्य।
एत मन्नमय मात्मान मुपसङ्क्रा मति।
एतं प्राण मय मात्मान मुपसङ्क्रा मति।
एतं मनोमय मात्मान मुपसङ्क्रा मति।
एतं विज्ञानमय मात्मानमुपसङ्क्रा मति।
एत मानन्दमय मात्मान मुपसङ्क्रा मति।
तदप्येष श्लोको भवति॥ ५॥

**इत्यष्टमोऽनुवाकः॥**

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।
एतꣳ ह वाव न तपति। किमहꣳसाधु नाकरवम्।
किमहं पापमकरव मिति। स य एवं विद्वानेते आत्मानꣳस्पृणुते।
उभे ह्येवैष एते आत्मानꣳस्पृणुते। य एवं वेद। इत्युपनिषत्॥ १॥

**इति नवमोऽनुवाकः॥**

**॥ इति ब्रह्मानन्दवल्ली समाप्ता॥**

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः॥

# ॥ भृगु वल्ली ॥

भृगुर्वै वारुणिः। वरुणं पितर मुपससार।

अधीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच।

अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति।

तꣳ होवाच। यतो वा इमानि भूतानि जायन्ते।

येन जातानि जीवन्ति।यत्प्रयन्त्य भिसं विशन्ति। तद्विजिज्ञा सस्व।

तद् ब्रह्मेति।स तपोऽतप्यत। स तप स्तप्त्वा॥ १॥

**इति प्रथमोऽनुवाकः॥**

अन्नं ब्रह्मेति व्यजानात्। अन्ना द्ध्येव खल्विमानि भुतानि जायन्ते।

अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्य भिसं विशन्तीति। तद्विज्ञाय।

पुनरेव वरुणं पितर मुपससार। अधीहि भगवो ब्रह्मेति।

तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति।

स तपोऽतप्यत। स तपस्तप्त्वा॥ १॥

**इति द्वितीयोऽनुवाकः॥**

प्राणो ब्रह्मेति व्यजानात्।

प्राणा द्ध्येव खल्विमानि भूतानि जायन्ते।प्राणेन जातानि जीवन्ति।

प्राणं प्रयन्त्य भिसं विशन्तीति।तद्विज्ञाय। पुनरेव वरुणं पितर मुपससार।

अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व।

तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ १॥

**इति तृतीयोऽनुवाकः॥**

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते।

मनसा जातानि जीवन्ति।

मनः प्रयन्त्य भिसं विशन्तीति। तद्विज्ञाय।

पुनरेव वरुणं पितर मुपससार। अधीहि भगवो ब्रह्मेति। त॰ होवाच।

तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति।

स तपोऽतप्यत। स तप स्तप्त्वा॥ १॥

**इति चतुर्थोऽनुवाकः॥**

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञाना द्ध्येव खल्विमानि भूतानि जायन्ते।

विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्य भिसं विशन्तीति।

तद्विज्ञाय। पुनरेव वरुणं पितर मुपससार।

अधीहि भगवो ब्रह्मेति। त॰ होवाच। तपसा ब्रह्म विजिज्ञा सस्व।

तपो ब्रह्मेति। स तपोऽतप्यत। स तप स्तप्त्वा॥ १॥

**इति पञ्चमोऽनुवाकः॥**

आनन्दो ब्रह्मेति व्यजानात्।

आनन्दा ध्येव खल्विमानि भूतानि जायन्ते।

आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्य भिसं विशन्तीति।

सैषा भार्गवी वारुणी विद्या। परमे व्योमन्प्रतिष्ठिता।

स य एवं वेद प्रति तिष्ठति। अन्नवान न्नादो भवति।

महान्भवति प्रजया पशुभि र्ब्रह्मवर्चसेन। महान् कीर्त्या॥ १॥

**इति षष्ठोऽनुवाकः॥**

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्।
शरीर मन्नादम्। प्राणे शरीरं प्रतिष्ठितम्।
शरीरे प्राणः प्रतिष्ठितः। तदे तदन्न मन्ने प्रतिष्ठितम्।
स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रति तिष्ठति। अन्नवान न्नादो भवति।
महान्भवति प्रजया पशुभि र्ब्रह्मवर्चसेन। महान् कीर्त्या॥ १॥

**इति सप्तमोऽनुवाकः॥**

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्।
ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्।
ज्योतिष्यापः प्रतिष्ठिताः। तदेत दन्न मन्ने प्रतिष्ठितम्।
स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवान न्नादो भवति।
महान्भवति प्रजया पशुभि र्ब्रह्मवर्चसेन। महान् कीर्त्या॥ १॥

**इत्यष्टमोऽनुवाकः॥**

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्।
आकाशोऽन्नादः। पृथिव्या माकाशः प्रतिष्ठितः।
आकाशे पृथिवी प्रतिष्ठिता। तदेत दन्न मन्ने प्रतिष्ठितम्।
स य एत दन्न मन्ने प्रतिष्ठितं वेद प्रति तिष्ठति। अन्नवान न्नादो भवति।
महान्भवति प्रजया पशुभि र्ब्रह्मवर्चसेन। महान्कीर्त्या॥ १॥

**इति नवमोऽनुवाकः॥**

न कञ्चन वसतौ प्रत्या चक्षीत । तद्व्रतम् ।
तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् ।
अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोऽन्नꣳ राद्धम् ।
मुखतोऽस्मा अन्नꣳराध्यते । एतद्वै मध्यतोऽन्नꣳ राद्धम् ।
मध्यतोऽस्मा अन्नꣳराध्यते । एदद्वा अन्ततोऽन्नꣳराद्धम् ।
अन्ततोऽस्मा अन्नꣳराध्यते ॥ १ ॥
य एवं वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः ।
कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ ।
इति मानुषी स्समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति ॥ २ ॥
यश इति पशुषु । ज्योतिरिति नक्षत्रेषु ।
प्रजाति रमृत मानन्द इत्युपस्थे । सर्वमित्याकाशे ।
तत्प्रतिष्ठे त्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत ।
महान्भवति । तन्मन इत्युपासीत । मानवान्भवति ॥ ३ ॥
तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः ।
तद् ब्रह्मे त्युपासीत । ब्रह्मवा न्भवति ।
तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः ।
परि येऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । यश्चासा वादित्ये । स एकः ॥ ४ ॥
स य एवं वित् । अस्मा ल्लोका त्प्रेत्य । एत मन्नमय मात्मान मुपसङ्क्रम्य ।
एतं प्राणमय मात्मान मुपसङ्क्रम्य । एतं मनोमय मात्मान मुपसङ्क्रम्य ।
एतं विज्ञानमय मात्मान मुपसङ्क्रम्य । एतमानन्दमयमात्मानमुपसङ्क्रम्य ।
इमाँ ल्लोक न्कामान्नी कामरूप्यनु सञ्चरन् ।

एतत् साम गायन्नास्ते । हा ३ वु हा ३ वु हा ३ वु ॥ ५ ॥

अहमन्नमहमन्नमहमन्नम् । अहमन्नादो २ ऽहमन्नादो २ ऽअहमन्नादः ।

अहꣳ श्लोक कृदहꣳ श्लोक कृदहꣳ श्लोक कृत् ।

अहमस्मि प्रथमजा ऋता ३ स्य ।

पूर्वं देवेभ्योऽ(अ)मृतस्य ना ३ भायि ।

यो मा ददाति स इदेव मा ३ ऽऽवाः ।

अहमन्नमन्नमदन्तमा ३ द्मि ।

अहं विश्वं भुवन मभ्यभवाम् ।

सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥ ६ ॥

**इति दशमोऽनुवाकः ॥**

**॥ इति भृगुवल्ली समाप्ता ॥**

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

॥ शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ॥

# ॥ महा नारायण उपनिषत् ॥

॥ हरिः ॐ ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः ।

शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।

त्वामेव प्रत्यक्षं ब्रह्म वादिषम् । ऋतम वादिषम् । सत्यम वादिषम् ।

तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

## ॥ अम्भस्य पारे ॥

अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् ।

शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः ॥

यस्मिन्निदꣳ सं च वि चैति सर्वं यस्मिन् देवा अधि विश्वे निषेदुः ।

तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्न् ॥

येनावृतं खं च दिवं मही च येनादित्य स्तपति तेजसा भ्राजसा च ।

यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः ॥

यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज भूम्याम् ।

यदोषधीभिः पुरुषान् पशूꣳश्च विवेश भूतानि चराचराणि ॥

अतः परं नान्यदणीयसꣳ हि परात्परं यन्महतो महान्तम् ।

यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥

तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम् ।

इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ॥

तदेवाग्नि स्तद्वायुस्त थ्सूर्य स्तदु चन्द्रमाः ।

तदेव शुक्रममृतं तद्ब्रह्म तदापस्स प्रजापतिः ॥

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।

कला मुहूर्ताः काष्ठाश्चाहो रात्राश्च सर्वशः ॥

अर्धमासा मासा ऋतव स्संवथ्सरश्च कल्पन्ताम् ।

स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः ॥

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।

न तस्येशे कश्चन तस्य नाम महद्यशः ॥

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्च नैनम् ।

हृदा मनीषा मनसाभिक्लुप्तो य एनं विदुरमृतास्ते भवन्ति ॥

अद्भ्य स्संभूतो हिरण्यगर्भ इत्यष्टौ ॥

एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः ।

स विजायमान स्स जनिष्यमाणः प्रत्यङ्मुखा स्तिष्ठति विश्वतोमुखः ॥

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् ।

सं बाहुभ्यां नमति सं पतत्रै र्द्यावापृथिवी जनयन् देव एकः ॥

वेनस्त त्पश्यन् विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येक नीडम् ।

यस्मिन्निद२ंसं च वि चैक२ं स ओतः प्रोतश्च विभुः प्रजासु ॥

प्र तद्वोचे अमृतं नु विद्वान् गन्धर्वो नाम निहितं गुहासु ।

त्रीणि पदा निहिता गुहासु यस्तद्वेद स वितुः पिताऽसत् ॥
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृत मानशाना स्तृतीये धामान्य भ्यैरयन्त ॥
परि द्यावापृथिवी यन्ति सद्यः परि लोकान् परि दिशः परि सुवः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत् तदभवत् प्रजासु ॥
परीत्य लोकान् परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मनाऽऽत्मान मभि सं बभूव ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम । सनिं मेधामयासिषम् ॥
उद्दीप्यस्व जातवेदोऽपघ्नन्निरृतिं मम ।
पशूꣳश्च मह्यममावह जीवनं च दिशो दिश ॥
मा नो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

## ॥ गायत्री मंत्राः ॥

पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥
तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥
तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् ॥
तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ॥
तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् ॥
वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् ॥

नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥

वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि। तन्नो नारसिꣳहः प्रचोदयात्॥

भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात्॥

वैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयात्॥

कात्यायनाय विद्महे कन्याकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥

[पाठभेदः]

चतुर्मुखाय विद्महे कमण्डलुधराय धीमहि। तन्नो ब्रह्मा प्रचोदयात्॥

आदित्याय विद्महे सहस्रकिरणाय धीमहि। तन्नो भानुः प्रचोदयात्॥

पावकाय विद्महे सप्तजिह्वाय धीमहि। तन्नो वैश्वानरः प्रचोदयात्॥

महाशूलिन्यै विद्महे महादुर्गायै धीमहि। तन्नो भगवती प्रचोदयात्॥

सुभगायै विद्महे कमलमालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्॥

नवकुलाय विद्महे विषदन्ताय धीमहि। तन्नः सर्पः प्रचोदयात्॥]

## ॥ दूर्वा सूक्तम्॥

सहस्रपरमा देवी शतमूला शताङ्कुरा।

सर्वꣳ हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी॥

काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि।

एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

या शतेन प्रतनोषि सहस्रेण विरोहसि।

तस्यास्ते देवीष्टके विधेम हविषा वयम्॥

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा।

शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥

## ॥ मृत्तिका सूक्तम् ॥

भुमि धेनु धरणी लोकधारिणी ।

उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ॥

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।

मृत्तिके ब्रह्मदत्ताऽऽसि काश्यपेना भिमन्त्रिता ।

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।

त्वया हतेन पापेन गच्छामि परमां गतिम् ॥

## ॥ शत्रुजय मंत्राः ॥

यत इन्द्र भयामहे ततो नो अभयं कृधि ।

मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ॥

स्वस्तिदा विशस्पति र्वृत्रहा विमृधो वशी ।

वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

आपान्तमन्यु स्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।

सोमो विश्वान्यतसावनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

स्योना पृथिवि भवा नृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीᳲ सर्वभूतानां तामिहोपह्वये श्रियम् ॥

श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु ।

विष्णुमुखा वै देवा श्छन्दोभिरिमाँल्लोकानन पजय्यम भ्यजयन्न् ।

महाᳲ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ॥

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि ॥

सोमानᳲ स्वरणं कृणुहि ब्रह्मणस्पते कक्षीवन्तं य औशिजम् ।

शरीरं यज्ञशमलं कुसीदं तस्मिन्थ्सीदतु योऽस्मान् द्वेष्टि ॥

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ।

तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम ॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।

जहि शत्रूᳲ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥

सुमित्रा न आप ओषधयः सन्तु ।

दुर्मित्रास्तस्मै भुया सुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ।

यो वः शिवतमो रसस्तस्य भाजयतेऽह नः । उशतीरिव मातरः ।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

## ॥ अघमर्षण सूक्तम् ॥

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।

यन्मया भुक्तम साधूनां पापेभ्यश्च प्रतिग्रहः ॥

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।

तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः ॥

नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥

यदपां क्रूरं यदमेध्यं यदशान्तं तदप गच्छतात् ॥

अत्याशनादतीपानाद् यच्च उग्रात् प्रतिग्रहात् ।

तन्नो वरुणो राजा पाणिना ह्यव मर्शतु ॥

सोऽहमपापो विरजो निर्मुक्तो मुक्त किल्बिषः ।

नाकस्य पृष्ठ मारुह्य गच्छेद् ब्रह्म सलोकताम् ॥

यश्चाप्सु वरुणः स पुनात्वघमर्षणः ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्णिया ।

असिक्निया मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।

ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥

समुद्रा दर्णवा दधि संवत्सरो अजायत ।

अहोरात्राणि विदध द्विश्वस्य मिषतो वशी ॥

सूर्याचन्द्रमसौ धाता यथा पूर्वम कल्पयत् ।

दिवं च पृथिवीं चान्तरिक्षमथो सुवः ॥

यत्पृथिव्याꣳ रजः स्वमा न्तरिक्षे विरोदसी ।
इमाꣳस्तदापो वरुणः पुनात्वघमर्षणः ॥
पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः ।
एष भूतस्य मध्ये भुवनस्य गोप्ता ॥
एष पुण्यकृतां लोकानेष मृत्योर् हिरण्मयम् ।
द्यावापृथिव्योर् हिरण्मयꣳ सꣲ श्रितꣳ सुवः । स नः सुवः सꣳशिशाधि ॥
आर्द्रं ज्वलति ज्योतिर हमस्मि । ज्योतिर्ज्वलति ब्रह्मा हमस्मि ।
योऽहमस्मि ब्रह्मा हमस्मि । अहमस्मि ब्रह्मा हमस्मि ।
अहमेवाहं मां जुहोमि स्वाहा ॥
अकार्य कार्य व कीर्णी स्तेनो भ्रूणहा गुरुतल्पगः ।
वरुणोऽपाम घमर्षण स्तस्मात् पापात् प्रमुच्यते ॥
रजोभूमिस्त्व माꣳ रोदयस्व प्रवदन्ति धीराः ॥
आक्रा न्तसमुद्रः प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥

## ॥ दुर्गा सूक्तम् ।

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥
पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमाथ्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥
प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥
गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

## ॥ व्याहृति होम मंत्राः ॥

भुरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा
सुवरन्नमादित्याय दिवे स्वाहा भूर्भुवस्सुवरन्नं चन्द्रमसे दिग्भ्यः स्वाहा
नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमोम् ॥

भूरग्नये पृथिव्यै स्वाहा भुवो वायवेऽन्तरिक्षाय स्वाहा
सुवरादित्याय दिवे स्वाहा भुर्भुवस्सुवश्चन्द्रमसे दिग्भ्यः स्वाहा
नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवःसुवरग्न ओम् ॥

भूरग्नये च पृथिव्यै च महुते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा
सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवस्सुवश्चन्द्रमसे च
नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्वधा
पितृभ्यो भुर्भुवः सुवर्महरोम् ॥

## ॥ ज्ञानप्राप्त्यर्था होम मंत्राः ॥

पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा ।
यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा ॥
पाहि नो अग्न एकया । पाह्युत द्वितीयया। पाह्यूर्जं तृतीयया।
पाहि गीर्भि श्चतसृ भिर्वसो स्वाहा ॥

## ॥ वेदाविस्मरणाय होम मंत्राः ॥

यश्छन्दसा मृषभो विश्वरूप श्छन्दोभ्य श्चन्दाꣳस्या विवेश।
सताꣳशिक्यः प्रोवाचोपनिष दिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो
नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्सुवश्छन्द ओम् ॥
नमो ब्रह्मणे धारणं मे अस्त्व निराकरणं धारयिता भूयासं
कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम् ॥

## ॥ तपः प्रशंसा ॥

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दमस्तपः शमस्तपो
दानं तपो यज्ञं तपो भूर्भुवः सुव ब्र्ह्मैत दुपास्वैतत्तपः ॥

## ॥ विहिताचरणप्रशंसा निषिद्धाचरणनिंदा च ॥

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो
दूराद्गन्धो वाति यथासिधारां कर्तेऽवहितमवक्रामे यद्युवे युवे
हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् ॥ १ ॥

## ॥ दहरविद्या ॥

अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान् महिमानमीशम् ॥
सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त जिह्वाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयां निहिताः सप्त सप्त ॥
अतः समुद्रा गिरयश्च सर्वेऽस्माथ्स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यन्तरात्मा ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणाꣳस्वधितिर्वनानाꣳसोमः पवित्रमत्येति रेभन्न् ॥
अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥
हꣳसः शुचिष द्वसुरन्तरिक्ष सद्धोता वेदिष दतिथि र्दुरोणसत् ।
नृषद्वर सदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
घृतं मिमिक्षिरे घृतमस्य योनि र्घृते श्रितो घृतमुवस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥
समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥
वयं नाम प्रब्रवामा घृतेनास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥
चत्वारि शृङ्गा त्रयो असय पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या॰ आविवेश ॥

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्न्।

इन्द्र एक॰ सूर्य एकं जजान वेनादेक॰ स्वधया निष्टतक्षुः ॥

यो देवानां प्रथमं पुरस्ता द्विश्वाधियो रुद्रो महर्षिः।

हिरण्यगर्भं पश्यत जायमान॰ स नो देवः शुभया स्मृत्या संयुनक्तु ॥

यस्मात्परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।

वृक्ष इव स्तब्धो दिवि तिष्ठ त्येकस्ते नेदं पूर्णं पुरुषेण सर्वम्॥

न कर्मणा न प्रजया धनेन त्यागे नैके अमृतत्व मानशुः।

परेण नाकं निहितं गुहायां बिभ्राजदे तद्यतयो विशन्ति ॥

वेदान्त विज्ञान सुनिश्चितार्थाः संन्यास योगा द्यतयः शुद्ध सत्त्वाः।

ते ब्रह्म लोके तु परान्तकाले परामृता त्परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेश्म भूत यत्पुण्डरीकं पुरमध्यस॰स्थम्।

तत्रापि दह्रं गगनं विशोक स्तस्मिन् यदन्तस्त दुपासि तव्यम्॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।

तस्य प्रकृति लीनस्य यः परस्स महेश्वरः ॥

## ॥ नारायण सूक्तम्॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं पदम् ॥

विश्वतः परमान्नित्यं विश्वं नारायण॰ हरिम्।

विश्व मेवेदं पुरुष स्तद्विश्व मुपजीवति ॥

पतिं विश्वस्यात्मेश्वर॰ शाश्वत॰ शिवमच्युतम्।

नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥
नारायणः परो ज्योतिरात्मा नारयणः परः ।
नारायणः परं ब्रह्म तत्त्वं नारायणः परः ॥
नारायणः परो ध्याता ध्यानं नारायणः परः ।
यच्च किञ्चिज्जगथ्सर्वं दृश्यते श्रूयतेऽपि वा ॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् ॥
पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥
ज्वालमाला कुलं भाती विश्वस्यायतनं महत् ।
सन्ततꣳ शिलाभिस्तु लम्बत्याकोशसन्निभम् ॥
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्नि र्विश्वार्चि र्विश्वतोमुखः ॥
सोऽग्रभुग्वि भजन्तिष्ठ न्नाहारमजरः कविः ।
तिर्यगूधर्व मधश्शायी रश्मयस्तस्य सन्तताः ॥
सन्तापयति स्वं देह मापाद तल मस्तकः ।
तस्य मध्ये वह्निशिखा अणीयोध्वा व्यवस्थितः ॥
नीलतो यद्मध्यस्था द्विद्यु ल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

## ॥ आदित्यमंडले परब्रह्मोपासनम् ॥

आदित्यो वा एष एतन् मण्डलं तपति तत्र ता ऋचस्तदृचा मण्डलꣳ
स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि
स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि
स यजुषा मण्डलꣳ स यजुषां लोकः सैषा त्रय्येव विद्या तपति
य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ॥ १ ॥

## ॥ आदित्यपुरुषस्य सर्वात्मकत्व प्रदर्शनम् ॥

आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्यु र्मनु र्मृत्युः सत्यो
मित्रो वायु राकाशः प्राणो लोक पालः कः किं कं तत्सत्य मन्न ममृतो जीवो
विश्वः कतमः स्वयम्भु ब्रह्मैत दमृत एष पुरुष एष भूताना मधिपति र्ब्रह्मणः
सायुज्यꣳ सलोकता माप्नोत्येता सामेव देवतानाꣳ सायुज्यꣳ
सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदे त्युपनिषत् ॥
घृणिः सूर्य आदित्योमर्चयन्ति तपः सत्यं मधु क्शरन्ति तद्ब्रह्म तदाप
आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ॥

## ॥ शिवोपासन मंत्राः ॥

निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिङ्गाय नमः।
हिरण्याय नमः। हिरण्यलिङ्गाय नमः। सुवर्णाय नमः। सुवर्णलिङ्गाय नमः।
दिव्याय नमः। दिव्यलिङ्गाय नमः। भवाय नमः। भवलिङ्गाय नमः।
शर्वाय नमः। शर्वलिङ्गाय नमः। शिवाय नमः। शिवलिङ्गाय नमः।

ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः ।

परमाय नमः । परमलिङ्गाय नमः ।

एतत्सोमस्य सूर्यस्य सर्व लिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम् ॥

## ॥ पश्चिमवक्त्र प्रतिपादक मंत्रः ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।

भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

## ॥ उत्तरवक्त्र प्रतिपादक मंत्रः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः

कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो

बलप्रमथाय नमः सर्वभुतदमनाय नमो मनोन्मनाय नमः ॥

## ॥ दक्षिणवक्त्र प्रतिपादक मंत्रः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

सर्वभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

## ॥ प्राग्वक्त्र प्रतिपादक मंत्रः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात् ॥

## ॥ ऊर्ध्ववक्त्र प्रतिपादक मंत्रः ॥

ईशानः सर्व विद्याना मीश्वरः सर्वभूतानां ब्रह्माधिपति र्ब्रह्मणोऽधिपति

र्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

## ॥ नमस्कारार्थ मंत्राः ॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये

अम्बिकापतय उमापतये पशुपतये नमो नमः ॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु ।

पुरुषो वै रुद्रः सन्महो नमो नमः ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।

सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंतमꣳ हृदे ।

सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥

## ॥ अग्निहोत्रहवण्याः उपयुक्तस्य वृक्षविशेषस्याभिधानम् ॥

यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रत्य वास्याहुतय स्तिष्ठत्यथो प्रतिष्ठित्यै ॥

कृणुष्व पाज इति पञ्च ।

## ॥ भुदेवताक मंत्रः ॥

अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ सर्वभूतानां

माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला

विश्वा भूता कतमा काया सा सत्येत्यमृतेति वासिष्ठः ॥ १ ॥

## ॥ सर्वदेवता आपः ॥

आपो वा इद१ँ सर्वं विश्वा भूतान्यापः प्राणा वा आपः
पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडाप श्छन्दा१ँस्यापो
ज्योती१ँष्यापो यजू१ँष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ओम् ॥

## ॥ संध्यावन्दन मंत्राः ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पति र्ब्रह्मपूता पुनातु माम् ॥
यदुच्छिष्ट मभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रह१ँ स्वाहा ॥
अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।
पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षम् । मनसा वाचा हस्ताभ्याम् ।
पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु । यत्किञ्च दुरितं मयि ।
इदमहं माममृतयोनी । सत्ये ज्योतिषि जुहोमि स्वाहा ॥
सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् ।
यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना ।
रात्रिस्तदवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं माममृतयोनी ।
सूर्ये ज्योतिषि जुहोमि स्वाहा ॥

## ॥ प्रणवस्य ऋष्यादिविवरणम् ॥

ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् ।
गायत्रं छन्दं परमात्मं सरूपम् । सायुज्यं विनियोगम् ॥

## ॥ गायत्र्यावाहनमंत्राः ॥

आयातु वरदा देवी अक्षरं ब्रह्म संमितम्।

गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व नः॥

यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते।

यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते।

सर्ववर्णे महादेवि सन्ध्याविद्ये सरस्वति॥

ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि

विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि

सावित्रीमावाहयामि सरस्वतीमावाहयामि छन्दर्षीनावाहयामि

श्रियमावाहयामि गायत्रिया गायत्री छन्दो विश्वामित्र ऋषिः

सविता देवताग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳ रुद्रः शिखा पृथिवी योनिः

प्राणापान व्यानोदान समाना सप्राणा श्वेतवर्णा सांख्यायन सगोत्रा गायत्री

चतुर्विꣳशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षोपनयने विनियोगः॥

ॐ भूः। ॐ भुवः। ओꣳसुवः। ॐ महः। ॐ जनः। ॐ तपः।

ओꣳ सत्यम्। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रचोदयात्।

ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्॥

## ॥ गायत्री उपस्थान मंत्राः ॥

उत्तमे शिखरे देवि जाते भूम्यां पर्वतमूर्धनि।

ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्॥

स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता ।

आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं ब्रह्मलोकम् ॥

## ॥ आदित्य देवता मंत्राः ॥

घृणिः सूर्य आदित्यो न प्रभा वात्यक्षरम् । मधु क्षरन्ति तद्रसम् ।

सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ॥

## ॥ त्रसुपर्णमन्त्रः ॥

ब्रह्ममेतु माम् । मधुमेतु माम् । ब्रह्ममेव मधुमेतु माम् ।

यास्ते सोम प्रजा वथ्सोऽभि सो अहम् । दुःष्वप्नहन् दुरुष्षह ।

यास्ते सोम प्राणाꣳस्ताञ्जुहोमि ॥

त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नन्ति ।

ये ब्राह्मणा स्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।

आ सहस्रात् पङ्क्तिं पुनन्ति । ॐ ॥

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधुमेधया ॥

अद्यानो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्नियꣳ सुव ॥

विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्म आसुव ॥

मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥

मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥

मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

य इमं त्रिसुपर्णं मयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति ।

ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।
आ सहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥

ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृद्ध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्न् ॥
हꣳसः शुचिष द्वसुरन्तरिक्ष सद्धोता वेदिषदतिथि दुरोणसत् ।
नृषद्वर सदृतसद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः ।
अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि ॥
हिरण्ययो वेतसो मध्य आसाम् ।
तस्मिन्त्सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः ।
तस्यासते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम् ॥
य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् ।
वीरहत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति ।
ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति । ॐ ॥

## ॥ मेधा सूक्तम् ॥

मेधादेवी जुषमाणा न आगा द्विश्वाची भद्रा सुमनस्यमाना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्री रुत त्वया ।
त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजौ ॥
अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती स मां मेधा सुरभिर्जुषता॑ स्वाहा ॥
आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

## ॥ मृत्यु निवारण मंत्राः ॥

अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु ।
पर्णं वनस्पतेरिवाभि नः शीयता॑रयिः सचतां नः शचीपतिः ॥
परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा॑ रीरिषो मोत वीरान् ॥
वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः ।
स नो मृत्यो स्त्रायतां पात्व॑हसो ज्योग्जीवा जराम शीमहि ॥
अमुत्र भुयादध यद्यमस्य बृहस्पते अभिशस्तेर मुञ्चः ।
प्रत्यौहता मश्विना मृत्युमस्मा द्देवानामग्ने भिषजा शचीभिः ॥
हरि॑ हरन्त मनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् ।
ब्रह्म सरूपमनु मेदमागादयनं मा विवधी र्विक्रमस्व ॥

शल्कै रग्निमिन्धान उभौ लोकौ सनेमहम्।
उभयो र्लोकयोर्ऋध्वाति मृत्युं तराम्यहम्॥
मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः।
प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥

## ॥ प्रजापति प्रार्थना मंत्रः ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाम्॥

## ॥ इंद्र प्रार्थना मंत्रः ॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयङ्करः॥

## ॥ मृत्युञ्जय मंत्राः ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥
ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे।
तान् यज्ञस्य मायया सर्वानवयजामहे॥
मृत्यवे स्वाहा मृत्यवे स्वाहा॥

## ॥ पाप निवारका मंत्राः ॥

देवकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृत स्यैनसोऽवयजनमसि स्वाहा ।

पितृकृतस्यैनसोऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजनमसि स्वाहा ।

अन्यकृतस्यैनसोऽवयजनमसि स्वाहा । अस्मत्कृतस्यैनसोऽवयजनमसि स्वाहा ।

यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा ।

यथ्त्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा ।

यथ्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा ।

यद्विद्वाँ॒सश्चाविद्वाँ॒सश्चैनश्चकृम तस्यावयजनमसि स्वाहा ।

एनस एनसोऽवयजनमसि स्वाहा ॥

## ॥ वसु प्रार्थना मंत्रः ॥

यद्वो देवाश्चकृम जिह्वयां गुरु मनसो वा प्रयुती देवहेडनम् ।

अरा वायो नो अभि दुच्छुनायते तस्मिन् तदेनो वसवो निधेतन स्वाहा ॥

## ॥ कामोऽकार्षीत् - मन्युरकार्षीत् मंत्रः ॥

कामोऽकार्षीरन्नमो नमः ।

कामोऽकार्शीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः

कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा ॥

मन्युरकार्षीन्नमो नमः । मन्युरकार्षी न्मन्युः करोति नाहं करोमि मन्युः कर्ता

नाहं कर्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा ॥

## ॥ विराज होम मंत्राः ॥

तिलाञ्जुहोमि सरसाꣳ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा ॥

गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳ श्रियै स्वाहा ॥

श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चाऽऽनृण्यताम्।

ब्राह्मण्यं बहुपुत्रताम्। श्रद्धामेधे प्रजाः संददातु स्वाहा ॥

तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः।

तिलाः पुनन्तु मे पापं यत्किञ्चिद् दुरितं मयि स्वाहा ॥

चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः।

गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शान्तिꣳ शमयन्तु स्वाहा ॥

श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽऽनृण्यताम्। ब्रह्मण्यं बहुपुत्रताम्।

श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं

विरजा विपाप्मा भूयासꣳ स्वाहा ॥

वाङ् मन श्चक्षुः श्रोत्र जिह्वा घ्राणरेतो बुद्ध्याकूतिः सङ्कल्पा मे

शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

त्वक्चर्म मांꣳसरुधिर मेदो मज्जा स्नायवोऽस्थीनि मे शुध्यन्तां

ज्योतिरहं विरजा विपाप्मा भुयासꣳ स्वाहा ॥

शिरःपाणि पाद पार्श्व पृष्ठो रूधर जङ्घ शिश्नोप स्थपायवो मे

शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता मे

शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

पृथिव्यप्तेजो वायु राकाशा मे शुध्यन्ता ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

शब्द् स्पर्श रूप रसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

मनो वाक्काय कर्माणि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

अव्यक्त भावै रहङ्कारैर्- ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भुयासꣳ स्वाहा ॥

अन्तरात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविट्ट्यै स्वाहा ।

ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । ॐ स्वाहा ॥

क्षुत्पिपासामलं ज्येष्ठामलक्ष्मी नाशयाम्यहम् ।

अभूति मसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा ॥

अन्न मय प्राण मय मनो मय विज्ञान मय मानन्द मय मात्मा मे

शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

## ॥ वैश्व देव मंत्राः ॥

अग्नये स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । ध्रुवाय भूमाय स्वाहा ।

ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा ॥

धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यः स्वाहा । ओषधिवनस्पतिभ्यः स्वाहा ।

रक्षोदेवजनेभ्यः स्वाहा । गृह्याभ्यः स्वाहा । अवसानेभ्यः स्वाहा ।

अवसानपतिभ्यः स्वाहा । सर्वभूतेभ्यः स्वाहा । कामाय स्वाहा ।

अन्तरिक्षाय स्वाहा। यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा।

पृथिव्यै स्वाहा। अन्तरिक्षाय स्वाहा। दिवे स्वाहा। सूर्याय स्वाहा।

चन्द्रमसे स्वाहा। नक्षत्रेभ्यः स्वाहा। इन्द्राय स्वाहा। बृहस्पतये स्वाहा।

प्रजापतये स्वाहा। ब्रह्मणे स्वाहा। स्वधा पितृभ्यः स्वाहा।

नमो रुद्राय पशुपतये स्वाहा। देवेभ्यः स्वाहा। पितृभ्यः स्वधाऽस्तु।

भूतेभ्यो नमः। मनुष्येभ्यो हन्ता। प्रजापतये स्वाहा। परमेष्ठिने स्वाहा॥

यथा कूपः शतधारः सहस्त्रधारो अक्षितः।

एवा मे अस्तु धान्यꣳ सहस्त्रधारमक्षितम्॥ धनधान्यै स्वाहा॥

ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः।

तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा॥

ओं तद्ब्रह्म। ओं तद्वायुः। ओं तदात्मा। ओं तत्सत्यम्। ओं तत्सर्वम्।

ओं तत्पुरोर्नमः॥ अनतश्चरति भुतेषु गुहायां विश्वमूर्तिषु।

त्वं यज्ञस्त्वं वषट्कार स्त्व मिन्द्र स्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः।

त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्॥

## ॥ प्राणाहुति मंत्राः॥

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि।

श्रद्धायामपाने निविष्टोऽमृतं जुहोमि। श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि।

श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि। श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि।

ब्रह्मणि म आत्मामृतत्वाय॥

अमृतोपस्तरणमसि॥

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा ॥

श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । अपानाय स्वाहा ॥

श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । व्यानाय स्वाहा ॥

श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । उदानाय स्वाहा ॥

श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । समानाय स्वाहा ॥

ब्रह्मणि म आत्मामृतत्वाय ॥ अमृतापिधानमसि ॥

## ॥ भुक्तान्नाभिमंत्रण मंत्राः ॥

श्रद्धायां प्राणे निविश्याऽमृतꣳ हुतम् । प्राणमन्नेनाप्यायस्व ॥

श्रद्धायामपाने निविश्याऽमृतꣳ हुतम् । अपानमन्नेनाप्यायस्व ॥

श्रद्धायां व्याने निविश्याऽमृतꣳ हुतम् । व्यानमन्नेनाप्यायस्व ॥

श्रद्धायामुदाने निविश्याऽमृतꣳ हुतम् । उदानमन्नेनाप्यायस्व ॥

श्रद्धायाꣳ समाने निविश्याऽमृतꣳ हुतम् । समानमन्नेनाप्यायस्व ॥

## ॥ भोजनान्ते आत्मानुसन्धान मंत्राः ॥

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।

ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥

## ॥ अवयवस्वस्थता प्रार्थना मंत्रः ॥

वाङ् म आसन्न् । नसोः प्राणः । अक्ष्योश्चक्षुः । कर्णयोः श्रोत्रम् ।

बाहुवोर्बलम् । उरुवोरोजः । अरिष्टा विश्वान्यङ्गानि तनूः ।

तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीः ॥

## ॥ इन्द्रसप्तर्षि संवाद मंत्रः ॥

वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेऽव बद्धान् ॥

## ॥ हृदयालंभन मंत्रः ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥

## ॥ देवता प्राण निरूपण मंत्रः ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

## ॥ अग्नि स्तुति मंत्रः ॥

त्वमग्ने द्युभि स्तवमा शुशुक्षणि स्त्वमद्भ्य स्त्वमश्मनस्परि ।
त्वं वनेभ्य स्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥

## ॥ अभीष्ट याचना मंत्रः ॥

शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व
ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्य र्द्धिमनु संतिष्ठस्वोप ते
यज्ञ नम उप ते नम उप ते नमः ॥

## ॥ परतत्व निरूपणम् ॥

सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ
हि सत्यं तस्मात्सत्ये रमन्ते
तप इति तपो नानशनात्परं यद्धि परं तपस्तद् दुर्धर्षं तद् दुराधर्षं

तस्मात्तपसि रमन्ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते

शम इत्यरण्ये मुनयस्तमाच्छमे रमन्ते

दानमिति सर्वाणि भूतानि प्रशꣳसन्ति दानान्नातिदुश्चरं तस्माद्दाने रमन्ते

धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मे रमन्ते

प्रजन इति भूयाꣳसस्तस्मात् भूयिष्ठाः प्रजायन्ते तस्मात् भूयिष्ठाः प्रजनने रमन्ते

अग्नय इत्याह तस्मादग्नय आधातव्याः अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते

यज्ञ इति यज्ञो हि देवा स्तस्मा द्यज्ञे रमन्ते

मानसमिति विद्वाꣳसस्तस्मा द्विद्वाꣳस एव मानसे रमन्ते

न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि

पराꣳसि न्यास एवात्यरेचयद्य एवं वेदेत्युपनिषत् ॥

## ॥ ज्ञानसाधन निरूपणम् ॥

प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं

पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच

सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः

प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति

तपसा देवा देवतामग्र आयन् तपसार्षयः सुवरन्वविन्दन् तपसा

सपत्ना न्प्रणुदामाराती स्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति

दमेन दान्ताः किल्बिष मवधून्वन्ति दमेन ब्रह्मचारिणः सुवरगच्छन्

दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति

शमेन शान्ताः शिव माचरन्ति शमेन नाकं मुनयोऽन्वविन्दञ्छमो

भूतानां दुराधर्षञ्छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति

दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवन्ति दानेनाराती

रपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्मा द्दानं परमं वदन्ति

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण

पाप मपनुदति धर्मे सर्वं प्रतिष्ठितं तस्मा द्धर्मं परमं वदन्ति

प्रजननं वै प्रतिष्ठा लोके साधु प्रजाया स्तन्तुं तन्वानः पितृणा मनृणो भवति

तदेव तस्या अनृणं तस्मात् प्रजननं परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः

पन्था गार्हपत्य ऋक् पृथिवी रथन्तर मन्वाहार्यपचनः यजु रन्तरिक्षं वामदेव्य

माहवनीयः साम सुवर्गो लोको बृहत्तस्मा दग्नीन् परमं वदन्त्यग्निहोत्रꣳ सायं

प्रातर्गृहाणां निष्कृतिः स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य

ज्योति स्तस्मा दग्निहोत्रं परमं वदन्ति

यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरा नपानुदन्त यज्ञेन द्विषन्तो

मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्मा द्यज्ञं परमं वदन्ति

मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः

प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान् मानसं परमं वदन्ति

न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमः स्वयम्भूः प्रजापतिः संवथ्सर

इति संवथ्सरोऽसावादित्यो य एष आदित्ये पुरुषस्स परमेष्ठी ब्रह्मात्मा

याभिरादित्य स्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधि वनस्पतयः

प्रजायन्त ओषधिवनस्पतिभि रन्नं भवत्यन्नेन प्राणाः प्राणैर बलं बलेन

तप स्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा

शान्तिः शान्त्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारꣳ स्मारेण विज्ञानं

विज्ञानेनात्मानं वेदयति तस्मादन्नं ददन्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति

भूतानां प्राणैर् मनो मनसश्च विज्ञानं विज्ञाना दानन्दो ब्रह्म योनिः

स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्व मिदं प्रोतं पृथिवी चान्तरिक्षं च

द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्व मिदं जगत्स स भूतꣳ स भव्यं

जिज्ञासक्लुप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वान् तपसो परिष्टाद् ज्ञात्वा तमेवं

मनसा हृदा च भुयो न मृत्यु मुपयाहि विद्वान्तस्मा न्यासमेषां तपसा मतिरिक्तमाहुः

वसुरण्वो विभूरसि प्राणे त्वमसि सन्धाता ब्रह्मन् त्वमसि

विश्वधृत्तेजोदा स्त्वमस्यग्ने रसि वर्चोदा स्त्वमसि सूर्यस्य द्युम्नोदा स्त्वमसि

चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत

तद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमान माप्नोति

तस्माद् ब्रह्मणो महिमान मित्युपनिषत् ॥

## ॥ ज्ञान यज्ञः ॥

तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीर मिध्ममुरो

वेदि र्लोमानि बर्हि र्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः

पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर् मनो

ब्रह्मा श्रोत्रमग्नी द्यावद् ध्रियते सा दीक्षा यदश्नाति तद्धवि र्यत्पिबति तदस्य

सोमपानं यद्रमते तदुपसदो यत्सञ्चर त्युपविश त्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं

तदाहवनीयो या व्याहृति राहुति र्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति

तथ्समिधं यत्प्रात र्मध्यन्दिनꣳ सायं च तानि सवनानि ये अहोरात्रे ते

दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा

ये संवथ्सराश्च परिवथ्सराश्च तेऽहर्गणाः सर्वं वेदसं वा एतथ्सत्रं यन्मरणं
तद् वभृथ एतद्वै जरामर्य मग्नि होत्रꣳसत्रं य एवं विद्वा नुदगयने प्रमीयते
देवाना मेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते
पितृणा मेव महिमानं गत्वा चन्द्रमसः सायुज्यꣳ सलोकता माप्नोत्येतौ वै
सूर्या चन्द्रमसो र्महिमानौ ब्राह्मणो विद्वा नभिजयति तस्माद् ब्रह्मणो
महिमान माप्नोति तस्माद् ब्रह्मणो महिमान मित्युपनिषत् ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ इति महानारायणोपनिषत्समाप्ता ॥

# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

तत्सद् ब्रह्मार्पणमस्तु । यद्भद्रम् तन्म आसुव ॥